२३
१३

"अथ"

१३
13

ग्रन्थनाम:	"तैत्तिरीयवार्त्तिकम्"	
कर्तृनाम:-	सुरेशः Suresha ?	
विषय:-	अद्वैतवेदान्तम् Advytam.	

Tytariya vartikam.

888

॥श्रीगणेशाय नमः॥ स संज्ञानमनंतमेकमकलं ध्वस्तांधकारं परं निर्द्वैतं हृदिपद्ममध्यनि
लयं निःशेषधीसाक्षिणं वेदांतोपनिविष्टबोधविषयं प्रसक्तकृपायोगिनां भक्त्या तं प्रणिपत्य
वेदशिरसोर्वक्ष्यामि सद्वार्त्तिकं॥१॥ यस्येदं सकलामलेंदुकिरणप्रख्यैर्यशोरश्मिभिर्व्याप्तं
यच्च कृपालुतापरवशश्चक्रे हितं दुःखिनां॥ यद्वाणीकुलिशावरुग्णमतयः पेतुर्दिश
स्तार्किकाः भक्त्या पूज्यतमं प्रणम्य तमहं तद्भाष्यनीतौ यते॥२॥ तैत्तिरीयकसारस्य मयाचा
र्यप्रसादतः। विस्पष्टार्थरुचीनां हि व्याख्येयं संप्रणीयते॥३॥ दुरितक्षयहेतूनि नित्यानि ब्रा
ह्मणे ययुः॥ काम्यानि चेह कर्माणि दृष्टादृष्टफलानि तु॥४॥ विद्या प्रस्तूयतेथोर्द्ध्वं यथाभूतार्थ
बोधिनी॥ कर्मोपादानहेतूंस्तान्स सेवो छेत्तुमलं यतः॥५॥ स यथाकाम इत्येवं योऽकाम श्चेति
सादनं यन्निहंति ततः कामाकामैकहेतूनो बंधमोक्षौ श्रुतिर्जगौ॥६॥ अपाविद्धद्वये तत्त्वे सर्व
देवात्मरूपके॥ विपर्ययान भिज्ञानात्ततः कामः क्रियास्ततः॥७॥ यदज्ञानात्प्रवृत्तिर्या तज्ज्ञानात्सा

नं यस्मान्न विद्यते ॥१८॥ पूर्वोपचितकर्मध्वस्तस्मात्कर्त्तारमेति या ॥ प्रत्यवायक्रिया तस्या
लक्षणार्थः श्रुता भवेत् ॥१९॥ नित्यानां च क्रिया यस्माल्लक्ष्यते वेति सत्तरो ॥ प्रत्यवायक्रियां त
तस्माल्लक्षणार्थे श्रुता भवेत् ॥२०॥ सर्वप्रमाणकोपः स्यादभावो ज्ञावसंभवे ॥ तस्मात्प्रयत्नतः
स्थानमात्मनीत्याति पेलवं ॥२१॥ निर्द्धूतातिशया प्रीतिः कर्महेतुरिति हया ॥ यदभावितद्
न्यायं यथा तदभिधीयते ॥२२॥ मुक्तेः कौटस्थ्यरूपत्वान्न तस्याः कर्मसाधनं ॥ स्वर्गा
दिवदनित्यास्याद्यदि स्यात्कर्मणः फलं ॥२३॥ अनित्यफलदायित्वं ज्ञानहीनस्य कर्म
णः । कूटस्थफलकारित्वं विद्येतस्येति चेन्मतं ॥२४॥ नैवमारभ्यमाणस्य ह्यनित्यत्वसमन्व
यात् ॥ न च प्राप्तमनित्यत्वं विद्यावारयितुं क्षमा ॥२५॥ प्रध्वंसाभाववच्चेत्स्यात्कर्मकार्यम
पि ध्रुवं ॥ भावात्मकत्वान्मोक्षस्य नैवमप्युपपद्यते ॥२६॥ कार्यप्रध्वंसतोन्यद्यत्तदनि
त्यं क्रियोत्थितं । घटादिवत्प्रतिज्ञायां विशिष्टत्वाददोषता ॥२७॥ प्रध्वंसाच्छकलादिः स

दायि

या द

कुतो भवेत्॥ तस्मात्सर्वप्रवृत्तीनाममलं विघ्नोपशांतये॥८॥ मोक्षार्थं न प्रवर्त्तेत तत्र काम्यनिषि
द्धयोः। नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया॥९॥ इति मीमांसकंमन्यैः कर्मोक्तं मोक्षसाधनं॥
प्रत्याख्यायात्मविज्ञानं तत्रन्यायेन निर्णयः॥१०॥ नैतदेवं भवेन्न्याय्यं विरुद्धफलदायिनां॥ संभ रु३
वात्कर्मणां पुंसो भूयसां शास्त्रदर्शनात्॥११॥ अनारब्धफलानीह संति कर्माणि कोटिशः। तद्ध
इहेति वच्चसो गम्यतां कर्मणां स्थितिः॥१२॥ न चैकदेहे भोगोस्ति ब्रह्महत्याश्वमेधयोः। विरुद्ध
फलहेतुत्वान्मूढसात्विकदेहयोः॥१३॥ सप्तजन्मानुगं कार्यमेकस्यापीह कर्मणः। श्रूयते ध
र्मशास्त्रेषु किमुतानेककर्मणां॥१४॥ अनारब्धेष्टकार्याणां नियं चेद्दुस्त्तयेमतं। नैवं स्वात्माक्रि
याहेतुं यतोऽनर्थं निहंति तत्॥१५॥ पापस्य कर्मणः कार्यं प्रत्यवायभिरोच्यते॥ नित्यैर्विशिधाच्चह्ना
निर्नविष्टफलदायिनेः॥१६॥ कामस्यैश्च कर्महेतुर्नस्तस्योच्छितेर्न संभवः। प्रत्यम्बाध
मृते यस्मादसम्यगिदमुच्यते॥१७॥ यद्धुनाम फलं तस्मै कर्म सर्वं विधीयते॥ आमत्वा द्वात्मनःक
मनैव स्यादाप्तयेततः॥१८॥ नित्यानां चाक्रियाभावः प्रत्यवायः ततः कुतः। नह्यभावाद्भवोद्भावोमा

श्रोतृक्रमः शन्नो विस्तीर्णक्रमपोह्यसौ॥३८॥ अध्यात्मदेवताः सर्वा मित्राद्याः शं भवन्तु नः॥
सुखकृत्तु हिता सुस्याद्विघ्नोपशमनं ध्रुवं॥३९॥ श्रवणाधारणं चैवमुपयोगश्च सिध्यति॥
ज्ञानस्याप्रतिबंधेन प्रार्थनीयमतो भवेत्॥४०॥ ब्रह्मविद्योपसर्गाणां शांत्यर्थं वायुरूपिणे॥ ब्रह्म-
जिज्ञासुना कार्यं नमस्कारोक्ति कर्मणी॥४१॥ सर्वक्रियाफलानां हि ब्रह्माधीनत्वहेतुतः॥ वायवे ब्रह्मणे तस्मै
प्रह्वीभावोस्तु सर्वदा॥४२॥ पारोक्ष्येणानमस्कृत्य प्रत्यक्षेणानमस्क्रिया॥ परोक्षसाक्षाद्रूपाभ्यां वायु-
रेवाभिधीयते॥४३॥ प्रत्यक्षं ब्रह्म हे वायो त्वमेवासीति संस्तुतिः॥ त्वामेवातो वदिष्यामि साक्षात्त्वमु-
पलभ्यसे॥४४॥ यथाशास्त्रं यथाकार्यं बुद्धौ सुपरिनिश्चितं॥ ऋतं तत्त्वदधीनत्वाद्वदिष्यामी-
स्तु४ ति संस्तुतिः॥४५॥ प्रयोगस्थं तदेवर्तं सत्यमित्यभिधीयते॥ तदपि त्वदधीनत्वाद्वदिष्याम्येव सांप्रतं॥४६॥
ने विद्यार्थिनोस्तु तं सम्यग्ब्रह्मावतु गुरुं च मे॥ विद्याग्रहणवक्तृत्वशक्तिभ्यां नौ सदावतु॥४७॥ वि-
द्याप्राप्त्युपसर्गाणां त्रिः शांतिरभिधीयते॥ आचार्यशिष्ययोस्तस्यां ब्रह्मज्ञातुं हि शक्यते॥४८॥
अर्थज्ञानप्रधानत्वाद्वेदांतानां विपश्चितां॥ पाठे त्वयत्नो मा प्रापदिति शीक्षाभिधीयते॥४९॥ शिक्ष्यते

स्मृताः॥६०॥ लोकादीनधिकृत्यसोत्तरधिलोंघतोभवेत्॥ पृथिव्यग्निरथाचार्यो मातायाचाधराहनुः॥
॥६१॥ पूर्वस्यात्संहितारूपं दिवादिसाद्यथोत्तरं॥ पूर्वोवर्णः पूर्वरूपमुत्तरश्चोत्तरं स्मृतं॥६२॥ संहिता
याइतिज्ञेयं ततोन्याकाचसंहिता॥ संधिः स्यान्मध्यमं छिद्रमाकाशादिस्तथैवच॥६३॥ संध
ते येनसंधानं वाय्वादि[illegible]र्हिकीर्त्यते॥ स्त्रीमाइतिवाक्येन प्रदर्श्यते यथोदिताः॥६४॥ वेदोपास्ते
तु यस्त्वेताः फलं तस्येदमुच्यते॥ शास्त्रार्पितधियोपेत्य ह्यातादात्म्याभिमानतः॥६५॥ चिरासन्नं
प्रवेदर्थंतदुपासनमुच्यते॥ संधीयते सौख्यगांतिः प्रजाभिरसंशयः॥६६॥ महतीः संहिता
वेदयोयथोक्ताः समाहितः॥ यः छंदसामितिज्ञानं मेधाकामस्य भण्यते॥६७॥ आवर्हंतीति
तद्वत्स्याच्छ्रीकामस्य हल्लिंगतः॥ छंदःशब्दाश्चयोवेदास्तत्प्रधानत्वकारणात्॥६८॥ ऋषभोवि
श्वरूपश्चेसर्ववाग्व्याप्तिकारणात्॥ अमृतेभ्यो सोवेदेभ्यः प्रतिभातः प्रजापतेः॥६९॥ ॐकारस्य
हि निःसत्वान्नांजसोत्पत्तिरुच्यते॥ ॐकारः सर्वकामेशः स इंद्रः परमेश्वरः॥७०॥ मेधयाप्रज्ञया

स्यात्तज्ज्ञानि संघट्यादिवत् ॥ कल्पनामात्रतो भावो नैवारम्भः सकर्मभिः ॥२८॥ आविर्भावतिरो-
भावे धर्मिण्यां मृदि सर्वदा ॥ धर्मा घटादयः सर्वे वर्त्तंते न हि भावगाः ॥२९॥ नास्त्यभावस्य संबंधः क्रियया
वा स्वरूपेन वा ॥ निरात्मकत्वान्नैवालं संबंद्धुं केनचित् क्वचित् ॥३०॥ तस्मात्स्यात्कल्पनामात्रो व्यवहार
प्रसिद्धये ॥ प्रध्वंसादिरभावोयं शिलापुत्रादिवन्मृषा ॥३१॥ तस्मादविद्याव्युच्छित्तौ स्यादवस्थानमा
त्मनि ॥ न चाविद्याप्रहाणं स्याद्ब्रह्मविद्यामृते क्वचित् ॥३२॥ तस्माद्विद्या प्रयत्ने ज्ञेया प्राध्योपनि
षत्परा ॥ सैवाविद्यापनुत्सर्थाऽविद्या चैवात्मगामिनी ॥३३॥ विद्यासंशीलिनां यस्मात् गर्भजन्मा
द्यशेषतः । उपमृद्नाति विद्येयं तस्मादुपनिषद्भवेत् ॥३४॥ उपेत्य वा निषण्णं तच्छ्रेय आसंतिकं
यतः । तस्मादुपनिषद्रूया ग्रंथस्तु स्यात्तदर्थतः ॥३५॥ प्राणापावृत्तेस्तथा चान्हो देवताया अभिमा
निनी ॥ मित्रः शं नः सुखं भूयादिति ब्रह्मेह याच्यते ॥३६॥ रात्रेरपानवृत्तेश्च वरुणश्चाभिमानभाक् ॥
शं नो भवतु सर्वत्र चक्षुःसूर्यश्चार्यमा रविः ॥३७॥ बलेच भगवानिंद्रो वाचि बुद्धौ बृहस्पतिः ॥ विष्णु

मांसः स्पृणोतु प्रीणँत्विति ॥ अमृतेत्वैकहेतोः स्यामात्मज्ञानस्य धारणाः ॥ ७१ ॥ विचक्षणां चमे भू
याच्छरीरं देवसर्वदा ॥ मनः प्रल्हादिनी मेस्यात् जिह्वा मधुरभाषिणी ॥ ७२ ॥ कर्णाभ्यां चैव वेदा
र्थं भूरि विश्रुणुयामहं ॥ ब्रह्मणाश्यासि कोशस्त्वमसेरिव परात्मनः ॥ ७३ ॥ अपविद्धैषणा यस्मा
त्वयि पश्यंति तत्परं ॥ अभिधानप्रतीकत्वद्वारेणास्योपलब्धये ॥ ७४ ॥ त्वमेव हेतुतां यासि तस्यालो
शात्वमुच्यते ॥ लौकिकप्रज्ञया यस्मान्मेधया विहितः स्तुतः ॥ ७५ ॥ नोपात्ते परा[illegible]क्षित्ता स्त्वां देवम सं ५
मृतंपदं ॥ रागद्वेषादिहेतुभ्यः श्रुतं गोपाय मे प्रभो ॥ ७६ ॥ येन श्रुतेन संपन्नस्त्वामेव प्रवि
शाम्यहं ॥ प्रापयं सावहंतीति विस्तरार्थोत्तराक्रिया ॥ ७७ ॥ कुर्वाणामुभयं देव चिरमावह मे श्रियं ॥
ततो वेदार्थविज्ञानादन्नपानां तदायिनीं ॥ ७८ ॥ लोमशां पशुभिर्युक्तां प्रसेकं सर्वदैव च ॥ मंत्रां ति ३
तज्ञापनार्थाय स्वाहाकारो यमुच्यते ॥ ७९ ॥ तथैव चोत्तरत्रापि स्वाहा तत्संभवाद्भवेत् ॥ देवेनमा
नुषेणेव वित्तेनामुत्रिकैहिकं ॥ ८० ॥ कर्म कर्तुमलं यस्मात् प्रार्थ्यते तेन तद्वयं ॥ आयांतु द्विश्य

मांसर्वेऽधीति श्रवणार्थिनः ॥ ८१ ॥ प्रहृष्यध्यं प्रमायं तु यत्नतो ब्रह्मचारिणः ॥ संभृय कोटि
शश्चैवं मामेवायं तु सहस्रशः ॥ ८२ ॥ जने सानि यशश्चेति पूर्वस्ये तत्प्रयोजनं ॥ वस्यसोऽहंस
का शाद्धं श्रेयांस्यां गुणतोऽधिकः ॥ ८३ ॥ वसीयसो वस्यस इति ईलोपः छांदसो भवेत् ॥ ईय
सुन्च सितु वस्या स्याद्वा वसुमतः परः ॥ ८४ ॥ अभीष्ठोतिशयो यस्मात्सजातीया दुपोन्नतेः ॥ ब्रं
ह्म णः कोशभूतं वो भगवत्प्रविशाम्यहं ॥ ८५ ॥ मां च सर्वात्मभावेन प्रविवेश प्रसीद मे ॥ ऐका
त्म्य मावयोरस्तु भेद हेतुं विनाशय ॥ ८६ ॥ अनंतभेदे ह्यव्येव निमज्जे दुःकृतं ततः ॥ द्रुतमापो
यथा यंति निम्नेन मकरालयं ॥ ८७ ॥ तथैवायंतु मां सर्वे समंताद्ब्रह्मचारिणः ॥ यस्मिन्नहानि
जीर्यंते सोऽद्यो हर्जर उच्यते ॥ ८८ ॥ अहर्जरे यथा सायंति संवत्सरात्मनि ॥ आसंन्न गृहपर्यायः प्राति
वेश इहोच्यते ॥ ८९ ॥ प्रतिवेश इवासि त्वं सर्वदुःखापनोदहृत् ॥ प्रतिप्राणिप्रवेशाद्वा प्रतिवेशोऽसि
कीर्तिसि ॥ ९० ॥ मां प्रयतः प्रभाहि त्वं प्रमापद्यस्व वांञ्छया ॥ उपासनमथेदानीं व्याहृत्या सन उच्यते ॥ ९१ ॥

चतुर्द्धा भुवरस्येषा द्वितीया व्याहृतिर्मता ॥२॥ द्यौरादित्यो यजुश्चेति व्यानश्चेति चतुर्थ्यपि ॥ महश्चै ६
वं पुरा प्रोक्ता चतस्रस्तु चतुर्विधाः ॥३॥ उक्तानां पुनरुक्तिः स्यादुपास्तिविधित्सया ॥ यथोक्ता व्या सा२
हृतीरेता वेदोपास्ते तु यो नरः ॥४॥ स वेद सकलं ब्रह्म वक्ष्यमाणविशेषणं ॥ ब्रह्म वेद स इत्येवं पु
नरुक्तिः किमुच्यते ॥५॥ वक्ष्यमाणानुवाकार्थविवक्षुत्वाददोषता ॥ स य एषोंतरित्यादि वक्ष्य
माणानुवाकगं ॥६॥ वस्तुरूपास्यमिहैवेति स वेदेति पुनर्वचः ॥ एकवाक्यमेतस्मात् द्वयोरप्य च५
नुवाकयोः ॥७॥ लोकादेवादयश्चास्मै उपासित्रे यथाबलं ॥ बलिं भोगं प्रयच्छंति फलमेतदु
पासितुः ॥८॥ तिस्रो व्याहृतयो यस्य ब्रह्मणोंगान्यवादिषं ॥ स्छानादिसिद्धये तस्य परः संदर्भ
उच्यते ॥९॥ स यः परोक्षनिर्दिष्टः प्रत्यक्षेपास दर्श्यते ॥ अंतर्हृदय आकाशे पश्यात्मानंव
मात्मना ॥१०॥ पद्माकारो हि मांसस्य खंडो हृदयमुच्यते ॥ आकाशस्तस्य मध्ये यो बुद्धेरायतनं सदा ॥
॥११॥ तस्मिन्नसपुरुषो ज्ञेयो मनोमय ईहांजसा ॥ शास्त्रिस्छराहुवत्साक्षान्मनस्येवोपलभ्यते ॥१२॥

स्वाराज्यफलसिध्यर्थं महिमातोस्य कीर्त्यते ॥ भूर्भुवःस्वरिति ज्ञेयाः प्रसिद्धा व्याहृतीर्नरैः ॥९२॥
तिस्रस्तासां चतुर्थी तु महइत्यृषिरभ्यधात् ॥ महाचमस्यगोत्रत्वाज्ज्ञोत्रार्थस्तद्धितो भवेत् ॥९३॥
महाचमस्योन्तःसाक्षान्महो वेदयते परं ॥ उपासनांगतार्थीयं ऋषिनामग्रहो भवेत् ॥९४॥ आर्षे
॥ षस्मृतिसंमिश्रं उपासनमिहोच्यते ॥ चतुर्थी व्याहृतिर्येयं ब्रह्मैसैव मुपास्यतां ॥९५॥ महत्वात्
ब्रह्म सा ज्ञेया आत्मा चाप्नोति येन सा ॥ आदित्यश्चेंद्र ब्रह्मान्न भूतेन व्यापिना यतः ॥९६॥ लोकदेवा
दयो व्याप्ता आत्मा तेन महो भवेत् ॥ देवताग्रहणं चात्र परिशिष्टोपलक्षणं ॥९७॥ लोका देवास्तथा वे
दाः प्राणाश्चांगानि सर्वशः ॥ महइत्यस्य ज्ञेयानि व्याहृत्यात्मन एव हि ॥९८॥ महीयंते यतः सर्व आ
दित्याद्यात्मना परे ॥ महइत्येवमुक्तेन तस्मादात्मा प्रवेन्महः ॥९९॥ आत्मना हि महीयंते हस्ताद्यंगा
नि सर्वशः ॥ यथा लोकादयस्तद्वदादित्याद्यात्मनैधितः ॥१००॥ अयं लोकोग्निऋग्वेदः प्राणश्चे
ति चतुर्विधा ॥ भूरिति व्याहृतिर्ज्ञेया तथैवान्याय थाक्रमं ॥१॥ अंतरिक्षं च वायुश्च सामवेदोपान एव च ॥

विधित्सायै परो ग्रंथो वतार्यते ॥ वियदेहमिदं ब्रह्म वियत्सदृशमेव च ॥ २३ ॥ मूर्तामूर्तस्वभावं च त्रैलो-
क्यात्मा ततो भवेत् ॥ इंद्रियारमणं चैव मन आनंदमेव च ॥ २४ ॥ शांत्यासमृद्धमूसर्थं ब्रह्मैतदमृतं प-
रं ॥ प्राचीनयोग्यापाख्येतद्यथा व्याख्यातलक्षणं ॥ २५ ॥ माहाचमस्य आचार्यअंतेवासिनमुक्तवान् ॥
पांक्तस्वरूपेणेतस्य भूयोप्यन्यदुपासनं ॥ २६ ॥ उदारफलसिध्यर्थं पृथिवीत्युच्यतेधुना ॥ पंचभि-
र्युतआरब्धं जगत्पांक्तमतो भवेत् ॥ २७ ॥ यज्ञः क्लृप्तो भवेदेवं पांक्तो यज्ञ इति श्रुतिः ॥ यज्ञेन परि-
क्लृप्तेन त्रैलोक्यात्मानमश्नुते ॥ २८ ॥ पांक्तत्वसिद्धये तस्मादारब्धैषा परा श्रुतिः ॥ ॥ दिग्गतं लोक-
पांक्तं स्यान्नक्षत्रांतं च दैवतं ॥ आत्मांतं भूतपांक्तं च ॥ ॥ अधिभूतमिति व्याख्या मथाध्यात्ममतः परं ॥
॥ ३१ ॥ वायुपांक्तं समानांतं त्वगंतं चेंद्रियं तथा ॥ चर्मादिधातुपांक्तं च विश्वमेतावदुच्यते ॥ ३२ ॥ पां-
क्तमेव जगत्सर्वमिति दृष्ट्वाभ्यधात्कृषिः ॥ पांक्तं वा इदमाब्रह्मस्तंबं नान्यदिति स्म ह ॥ आध्या-
त्मिकेन पांक्तेन संख्यासामान्यकारणात् ॥ बलयत्यात्मभावेन पांक्तं बाह्यमशेषतः ॥ ३३ ॥ सर्वोपास-
विराडात्माधिकारतः ॥ उपलक्षणमेतत्स्याद्दैवतालोकपांक्तयोः ॥ ३४ ॥ ५

न शेषस्य प्रणवस्याधुनोच्यते॥ उपासनमलं यस्माद्ब्रह्मणोः प्राप्तये द्वयोः॥३४॥ परस्य ब्रह्म
णो यस्मादपरस्य च चोद्यते॥ आलंबनतया तस्मात्स एवात्राभिधीयते॥३५॥ ओमित्येतच्छब्द
रूपं ब्रह्मेति मनसा सदा॥ धारयेत्स्तुतये तस्य प्रयोगेथोवतार्यते॥३६॥ तद्यथा शंकुनेत्येवं स
र्वमोमिति युज्यते॥ अभिधानादृते यस्मादभिधेयं न विद्यते॥३७॥ अनुज्ञानुकृतिस्तद्व
त्सर्वत्रोमिति कीर्त्यते॥ ओं श्रावयेत्यनुज्ञाता यतआश्रावयंति च॥३८॥ प्रसौति ह्यनुजानाति
ब्रह्मोमित्ये वच र्विजः॥ प्रवक्ष्यन्ब्राह्मणो वेदमोमित्येवं प्रयुज्यते॥३९॥ उपाप्नुवानि ब्रह्मे
वा ति स च वेदमवाप्नुयात्॥ परात्मा भवेद्ब्रह्म सतदोंकारपूर्वकं॥४०॥ प्राप्नोत्येव न संदेह उपासीत तदोम्
मिति॥ यथोक्तोपासनादेव स्वाराज्यफलसंश्रयात्॥४१॥ नैःफल्ये कर्मणां प्राप्ते तत्साफल्यार्थ उच्चरः॥
स्वाध्यायाध्ययनं ज्ञेयं तथा चाध्यापनं परं॥४२॥ आधातव्या यथाशास्त्रमग्नयः श्रेयसे तथा॥ होतव्यम
ग्निहोत्रं च कुर्याच्चातिथिपूजनं॥४३॥ तथा संव्यवहारश्च मानुषं स्याद संशयं॥ उत्साद्या च प्रजा योग्या–

प्रजनश्चर्तुसेवनं॥४४॥ निवेशनं सुतस्येह प्रजातिरिति गम्यतां॥ उक्तेषु व्यापृतेनापिका
र्यएवप्रयत्नतः॥४५॥ स्वाध्यायप्रवचने तेन प्रसेकं चग्रहस्तयोः॥ वेदार्थबोधनं नास्ति स्वाध्या
येन विना यतः॥४६॥ तथा प्रवचनेनाबोधमार्थं च ग्रहस्तयोः॥ सत्यमेव तु वक्तव्यमितिस
त्यवचाऽजगौ॥४७॥ राथीतरो मुनिस्तद्वत्तप एवेत्यपि वाचाह॥ पुरुशिष्टस्य तनयः कर्तव्यं तु म
हत्तपः॥४७॥ मुद्गलस्यात्मजश्चाह कर्तव्ये यत्नमास्थितेः॥४८॥ स्वाध्यायप्रवचने एव तेए
व तु तपो यतः॥४९॥ स्वाध्यायार्थश्च विज्ञेयः अहं वृक्षस्य रेरिवा॥ इत्यादिरुत्तरो ग्रंथो विशुद्धि
हितातो द्वियः॥५०॥ विशुद्धमनसो यस्मात्सम्यग्ज्ञानोदयो भवेत्॥ मंत्राम्नायोयमारब्ध एतस्मा
त्कारणात्परः॥५१॥ उच्छित्तिलक्षणस्याहं विश्वस्य जगतः सदा॥ अस्य संसारवृक्षस्य रेरिवा
जनकोस्म्यहं॥५२॥ कीर्तिः ख्यातिर्मम स्ज्ञेया गिरेः पृष्ठमिवोच्छ्रिता॥ ऊर्ध्वं तत्कारणं ब्रह्म पवि
त्रं भवहानतः॥ यस्य सोहं भवे दूर्ध्व पवित्रः पावनं परं॥५३॥ वाजमन्नमिति ज्ञेयं तद्वतीव दिवा

मनुते मनसा यस्मात्तेनायं स्यान्मनोमयः ॥ स्याद्वा तदभिमानित्वात्तल्लिंगात्तन्मय स्मृतः ॥१३॥
अमृतोऽमृतरूपाधर्मस्याद्धिरण्मयं ज्योतिरुच्यते ॥ तन्मयोयं पुमान्ध्येयस्तत्स्थानो द्वार[illegible]च्यते ॥ थो
॥१४॥ ऊर्ध्वप्रवृत्ता नाड्येका सुषुम्ना हृदयादधि ॥ गत्वा तालुकयोर्विद्धान्मध्ये नोदानगर्भया
॥१५॥ स्तनवल्लंबते कंठे मांसखंडस्त्वधोमुखः ॥ इंद्रस्यासौ सृतिर्ज्ञेया रेचकेन तया व्रजेत् ॥१६॥
तया गत्वाथ यत्रास्य केशांतो विवर्त्तते ॥ भित्वा शिरः कपाले द्वे भूरित्यग्निं प्रपद्यते ॥१७॥ द्वि
तीययाथ व्याहृत्या वायौ संप्रतितिष्ठति ॥ आदित्यं सुवरित्येवं लोकेऽसौ प्रतितिष्ठति ॥१८॥ स्थित्वैव
मंगत्रतेषु प्रतितिष्ठत्यथांगिनि ॥ महइत्यात्मनि स्थित्वा स्वाराज्यं प्रतिपद्यते ॥१९॥ नान्यो
राजास्ति यस्येह राजा यः स्वयमेव तु ॥ स स्वराट् तस्य भावश्च स्वाराज्यमिह कीर्त्यते ॥२०॥ म
नोगीश्चक्षुषां चैव श्रोत्रविज्ञानयोरपि ॥ आप्नोति पर्युपासीनः स्वाराज्यं नात्र संशयः ॥२१॥ तत एत
त्फलं दिव्यं यथोक्तोपासनाद्भवेत् ॥ व्याहृत्यात्मन एतस्य रूप संक्लृस येधुना ॥२२॥ उपासन

अध्याप्य निखिलं वेदमंतेवासिनमादरात्॥ सत्यं वदेत्येवमादि गरीयाननुशास्ति हि॥६५॥
यथोपलब्धं यद्वाक्यं हिंसाकल्कविवर्जितं॥ सर्वधर्मविदः प्राज्ञास्तत्सत्यं प्रतिजानते॥६६॥ अ
ग्निहोत्राद्यनुष्ठानं धर्ममाहुर्विपश्चितः॥ प्रमादं धास्तद्वत्स्वाध्यायं प्रति सर्वदा॥६७॥ त
थाभिलषितान्याप्यामाचार्याय दक्षिणां॥ दत्वा दारान्समाहृत्य समाछेत्सीः सुतसंततिं॥६८॥
व५ विस्मृत्यापत्यनं तं निसं नैवं रूव्यमव्यपि॥ इत्यस्य प्रतिपत्त्यर्थं सत्यादिति पुनर्वचः॥६९॥ ए
वं शिष्टेष्वपि ज्ञेयं प्रसिद्धार्थत्वकारणात्॥ स्पष्टार्थउत्तरो ग्रंथः स्वयमेवावगम्यतां॥७०॥ उक्ते
ना४ भ्यो न्यानि कर्माणि शिष्टाचारोपगानि तु॥ अनाशंकितदोषाणि त्वया कार्याणि यत्नतः॥७१॥ समा
शंकितदोषाणि शिष्टैराचरितान्यपि॥ सावधानेन कार्याणि कर्माणीह कदाचन॥७२॥ श्रुति-
स्मृत्यविरुद्धानि शिष्टाचारोपमानि च॥ अस्मत्कर्माणि कार्याणि न विरोधीनि कर्हिचित्॥७३॥ अ
स्मत्तो ब्राह्मणा ये स्युः श्रेयांसः शास्त्रवेदिनः॥ तेषामासनदानेन श्रमापनयनं कुरु॥७४॥ तेषा

मं

करे॥ स्वमृतं परं ब्रह्मबुद्ध्वा वस्यामहं सदा॥५४॥ द्रविणं धनमित्याहुरिहत्मावबोधनं॥ स
वर्चसं सुदीप्तं स्यान्मोक्षामृतफलप्रदं॥५५॥ अक्षितोऽक्षीणरूपत्वाद्वेदानुवचनं तिदं॥ त्रि
शंको ब्रह्मभूतस्य ह्यार्षं संदर्शनं परं॥५६॥ पावनोस्य जपः श्रेयान्ब्रह्मज्ञानस्य जन्मने॥
मुमुक्षुः प्रयतस्तस्माज्जपेदेतं समाहितः॥५७॥ कर्मप्रसंगत्यक्त्वा दयमर्थो वसीयते॥ मुमु
क्षोस्तत्परस्यैव श्रोतस्मार्त्तेषु कर्मसु॥५८॥ आर्षं च प्रातिभं ज्ञानमाविर्भवति मोक्षदं॥ आरंभो
नियमार्थः स्यादात्मज्ञानोदयात्पुरा॥५९॥ श्रुतेर्वेदमनूच्येति श्रुतिश्चैवानुशास्ति हि॥ वि
द्यास सर्थमेतानि कर्त्तव्यानि मुमुक्षुणा॥६०॥ वक्ष्यमाणानि कर्माणि यावदात्मावबोधनं॥६२॥
आत्मज्ञानोदयादूर्ध्वं पुरुषार्थावसानतः॥ स्वतःसिद्धश्च मोक्षस्य कर्मकांडमनर्थकं॥६३॥ त
स्मात्सत्वविशुद्ध्यर्थं कार्यं कर्म मुमुक्षुभिः॥ प्रागेव ब्रह्मविज्ञानान्नियमेनेति हि श्रुतिः॥६४॥ आ
नर्थक्यात्तु सर्थमृतादीनां पुराश्रुतिः॥ नियमार्थमिहोक्तिः स्यादात्मज्ञानोदयार्थिनः॥६५॥

पं१

मास्छायिकायां वा न वाच्यं संभ्रमात्तथा॥ यदुक्तं सारंलादायनापकार्यं यथाबलं॥७५॥ श्रद्धयै
व हि दातव्यमश्रद्धाभाजनेष्वपि॥ श्रीर्विभूतिस्तया देयं देयं वापि सदाह्रिया॥७६॥ भियाभ
येन दातव्यं संविन्मैत्रीतयापि वा॥ एवं जैद्वर्त्तमानस्य श्रौतस्मार्त्तेषु कर्मसु॥७७॥ वृत्ते वा विचि
कित्सा स्यात्संशयो मतिविभ्रमात्॥ तस्मिन्कर्मपि वृत्ते च विप्राय सूक्ष्मदर्शिनः॥७८॥ स्वतं
त्रोऽभियुक्ताश्च वक्रजवः कामवर्जिताः॥ यथा ते तत्र वर्त्तेते वर्त्तेथास्त्वं तथैव च॥७९॥ तथा शं
कितदोषेषु यथोक्तमुपपादयेत्॥ आदेशोत्र विधिर्ज्ञेय उपदेशः सुतायच॥८०॥ रहस्यं सर्ववेदा
नां वेदोपनिषदुच्यते॥ अनुशासनमीशस्य ज्ञेयमेतस्य रात्मनः॥८१॥ यस्मादेवमतः सद्भिर्यथो
क्तं यन्न मास्थिते॥ उपासितव्यं कर्त्तव्यमेवं चैतत्समाचरेत्॥८२॥ प्रमादोत्थाद्दपन्यायाज्जुरशि
ष्याभिसंगते॥ प्रसक्तो यस्तयोर्द्वेषस्तच्छांसे शौतिरुच्यते॥८३॥ स्याज्ज्ञानं फलवद्यस्माच्छांतां ततः
करणो गुरो॥ तस्येश्वरेणानन्यलाद्वयः शांतिरियं ततः॥८४॥ भाव्यं तु परिहाराय तन्माभावीद्धितीरणं॥

॥इतिशिक्षासमाप्ता॥२

दो३

आत्मनोब्रह्मतांयस्मात्स्वतःसिद्धांप्रवक्ष्यति॥८५॥ कामादयोयदज्ञानोत्त[illegible]ज्ञानान्स्याद्कामता॥ (ना written above the line)
अतःपरंतदैकात्म्यंवक्ष्यतेज्ञानघस्मरं॥८६॥ नानागतमनेतिह्यंप्रसगेकमविक्रियं॥ अनादे
यमहेयंयन्नमस्तस्मैसदादृशे॥८७॥ यावंत्कपासनान्यांवविरुद्धानिकर्मभिः॥ संहिताविष
यादीनिस्युस्तान्यभ्युदयायतु॥८८॥ नचैताव[stain]दवहंभात्कामकर्मोद्भवहतः॥ सर्वानर्थै
कबीजस्यमोहस्यास्तिनिराक्रिया॥८९॥ तस्मात्संसारमूलस्यभृशमुच्छित्तयेधुना॥ यथा
भूतार्थबोध्यात्मज्ञानंसम्यक्प्रवक्ष्यते॥९०॥ नित्यकर्माद्यनुष्ठानाच्छुद्धांतःकरणःपुमान्॥ वि
रक्तश्चाग्रजाल्लाभात्स्वर्गपुत्रादिलाभवत्॥९१॥ प्रसक्षागमलिंगैर्हियद्यत्कर्मोद्भवंफलं॥
घ ततक्षयिष्णुतिविज्ञायविरक्तोनरकाद्यथा॥९२॥ अपास्ताशेषदोषंयत्सर्वकामनिरासकृत्॥
तदनाप्तंतमोमात्राप्रसिद्धेर्वहितघतः॥९३॥ तदनाप्तिकृदज्ञानध्वस्तयेवलंनकारकं॥ [illegible]त्यज्ञा
नेधिकार्यस्मात्स्यक्तपूर्वोक्तसाधनः॥९४॥ त्यागएवहिसर्वेषांमोक्षसाधनमुत्तमं॥ त्यजतेवहि

न्यथातः प्रवर्त्स्यते ॥४॥ क्षयिष्णु साधनाधीनं फलं बुध्वा वितृष्णतः ॥ कामहेतोरनुच्छित्तेर
परात्परमिच्छति ॥५॥ साध्यसाधनवद्वाक्यं तद्विज्ञार्थसिद्धये ॥ प्राह ब्रह्मविदाप्नोति श्रुतिः प्र
त्यक्प्रवेशिनी ॥६॥ शिखातेवर्द्धते वत्स गुडीवी अद्धया पिब ॥ मातेव प्रेरयेद्बालं तदसंभाव्यसि
द्धये ॥७॥ साध्यसाधनसंबंधात्स्वस्य कार्यहदोषधीः ॥ साचैवं रूपविज्ञानमशिखिपुष्पाविनक्ष
ति ॥८॥ माभूदल्पमपि मे दुःखं सुख्येव स्यामहं सदा ॥ इति स्वतोभिलाषोयं सहेव विषये भवे
त् ॥९॥ अज्ञातमोक्षरूपोपि कैवल्याय प्रवर्त्तते ॥ अलं यथोक्तकामेद्धिपवोभवभीषि
तः ॥१०॥ प्रवृत्तिजनकं यस्मात्स वैवेव प्रयोजनं ॥ श्रुतिर्ब्रह्मविदाप्नोतीत्याह पुंसः प्रलुब्धये
॥११॥ फलश्रुत्यंकुशाकृष्टः श्रवणादौ प्रवर्त्तते ॥ तत्पूर्वकं यतोज्ञानं श्रुतिश्चैवमभाषत ॥१२॥
लौकिकी वैदिकी चाथ प्रवृत्तिर्येह काचन ॥ नर्त्ते प्रयोजनं यस्मात्तदेवातः प्रवृत्तिकृत् ॥१३॥ ब्र
ह्मविद्ब्रह्म वेत्तीति यः स आप्नोति तत्परं ॥ स सादिलक्षणं ब्रह्म वक्ष्यते तत्तु चास्फुटं ॥१४॥ स

स्या सा वा

फलोक्तिः परमाप्नोती[stain]ता ब्रह्मविदुच्यते॥ सामर्थ्याद्ब्रह्मविद्या तु परस्या वाप्तिसाधनं॥१५॥
स्वर्गं यथाग्निहोत्रेण यजमानः प्रधायेत॥ परावाप्तिं तथा कुर्याद्ब्रह्मविद्यया॥१६॥ ब्रह्मैव प
रं प्राह्यं तज्ज्ञानं नान्यसाधये॥ अन्यज्ज्ञानं हि नापि ~~जिशमसस्वत्तदेति~~ न्यस्य द्वाचि दर्पास्पये विद्ब्रह्म
यतः॥१७॥ देशकालादिसंभेदपूर्विकावाप्तिरिष्यते॥ देशकालाद्यभिस्य कथं स्वेच्य
च्यते यथा॥१८॥ सर्वात्मनोप्यनाप्तिः स्याद्दशमस्येव मोहजा॥ पंचस्वन्नमयाद्येषु स्वहमस्मीति न्न४
विभ्रमात्॥१९॥ दशमोस्मीसतोज्ञानाद्दज्ञानध्वस्तिवर्त्मना॥ दशमाप्तिवदाप्तिः स्यात्ब्रह्म
णोज्ञानहानतः॥२०॥ विचित्रवेद्य वेद्यादौ गोपं ब्रह्मयतः स्ततः॥ अभिन्न वेद्य वेद्यादिग्राह्यं
मुख्यार्थसिद्धये॥२१॥ अन्यदृष्टाविवानोच न नियोगो मनागपि॥ मोहविध्वंसमात्रेण निवृ प्र३
त्तो रोगहानिवत्॥२२॥ कर्तृतां प्रत्यगालिंग्य योऽकर्तात्मानमीप्सति॥ उल्कापिशाचं सोभ्ये
ति शीतार्तः पावकेच्छया॥२३॥ करोमीति धिया चेतद्ब्रह्मास्मीति हि लभ्यते॥ भूतालाभेस्य को

हेतुर्नह्यतोन्योस्य दर्शनात्॥२४॥ तस्मादविद्यासंभूतकर्तृप्रसंगविक्रियं॥ अविद्यानर्थतत्कार्य
प्रत्याख्यानेन बोध्यते॥२५॥ कर्तृज्ञातृहिया दृष्टिः सामान्याद्यर्थसंश्रया॥ तस्यह्यगात्मदृष्ट्या तांप्र
त्याख्यांयाश्रुतेपरं॥२६॥ अशेषानंदवल्ल्यर्थसूत्रमाद्यमिदंवचः॥ यस्मात्तस्मात्तदर्थस्यह्यावि
ष्कृद्दृगुदीर्यते॥२७॥ विशेषणविशेष्यत्वात्सत्यादीन्यतएवच॥ चत्वार्येकविभक्तीनि नीलरक्तो
त्पलादिवत्॥२८॥ वेद्यत्वेन यतो ब्रह्म प्राधान्येन विवक्षितं॥ तस्माद्विशेष्यं विज्ञेयं ततोन्यस्मा-
द्विशेषणं॥२९॥ नीलं महत्सुगंधीति विशिष्टं स्यादुत्पलं यथा॥ एकाधिकरणान्येवं सत्यादीनि प
रं महत्॥३०॥ एवं विभज्यमानं सत्सत्यमित्येवमादिभिः॥ स्वविशेषविरुद्धेभ्यो धर्मिभ्यः स्याद्वि
राकृतं॥३१॥ एवं च सति तज्ज्ञातं यदन्येभ्योवधार्यते॥ नीलोत्पलादिवद्ब्रह्मनान्यथावधारणा
त्॥३२॥ ननु व्यभिचरद्वस्तु स्याद्विशेष्यं विशेषणैः॥ ब्रह्मांतराद्दृते तच्च कुतो ब्रूहि विशेष्यता॥३३॥
विशेषणविशेष्यत्वे सति दोषः प्रसज्यते॥ लक्ष्यलक्षणतायां तु न दोषोत्र मनागपि॥३४॥ अनेका

तद्भेदस्य कुतः प्रसक्तः परं पदं ॥१५॥ त्यज धर्ममधर्मं च तथा सत्यानृते अपि ॥ न्यासो ब्रह्मेति
च प्राह तैत्तिरीयश्रुतिस्तथा ॥१६॥ क्षयिष्णु साध्यं विज्ञाय निःशेषं कर्मसाधनं ॥ तत्त्यागसाधन
ज्ञाने३ स्तस्मात्प्रसंगः प्रवर्त्तते ॥१७॥ उत्पत्त्यादिस्वतश्चे त्स्यात्कर्मणा किं प्रयोजनं ॥ स्वत एव न चेत्त
त्स्याद्दृढस्यात्कर्मणात्र किं ॥ उत्पत्त्यादौ तु यत्कर्म हेतुमात्रमपेक्षते कर्मव्यपेक्षा तस्यैव घटो
त्पत्तौ मृदो यथा ॥१८॥ नित्यसंनभवनं यस्य यस्य वा नित्यभूतता ॥ न तस्य क्रियमाणत्वं खपुष्पा
काशयोरिव ॥१९॥ कर्त्तव्यतानुसाध्यस्य विदितत्वाद्विधीयते ॥ दुःखत्वाच्च न यागस्य ह्यु
पायस्त्ववबोध्यते ॥२०॥ विजिज्ञासस्त्वतदिति ब्रह्मज्ञाने प्रवर्त्तकं ॥ जिज्ञास्यलक्षणोक्तिः
स्याद्यतो वा इति च श्रुतिः ॥१॥ कोशप्रत्यक्प्रवेशेन पूर्वपूर्वप्रहाणतः ॥ कारकादिनिषेधेन
ह्युपायो ब्रह्मवेदने ॥२॥ अविद्योद्भूततृष्णेन पुंसा यत्कल्पितं फलं ॥ अनंतफलसिद्ध्यर्थं तद
नूक्तिः प्रवर्त्तये ॥३॥ कर्त्तुः कर्मापि कार्यार्थमनात्मफलदानि हि ॥ पुरोक्तानियतानासाव

समन्वयात्॥४५॥अतस्तत्प्रतिषेधार्थमनंतमिति शब्द्यते॥अंतः सीमा तथेयत्ता तन्निषेधस्त्व
नंतता॥४६॥अनन्ततादिनिषेधेन सत्तादीनामुपक्षयात्॥ब्रह्मपाश्चात्प्रसिद्धत्वान्मिथ्यार्थैश्च द्व
चोनतत्॥४७॥परमार्थमनालिंग्य न दृष्टं वितथं यतः॥तस्माद्द्वावितथं सर्वं परमार्थैकनिष्ठितं॥
४८॥पदार्थसदर्थबुद्धिर्न उपलादौ प्रजायते॥तदभावधियेनालं पदं वाक्यार्थरूपतः॥४९॥प्रति
पद्यपदार्थे हि विरोधात्तद्विरोधिनः॥पश्चाददभावं जानाति वध्यघातकवत्सदात्॥५०॥शब्दात्प्रतीय
ते तावदसंगतिर्धर्मधर्मिणोः॥मानांतरादपोहस्तेन शाब्दस्तेन संस्मृतः॥५१॥न नीलवदना
दाय नीलधीरुपजायते॥विशेष्यज्ञानमप्येवं नांतरेण विशेषणं॥५२॥वाक्यार्थानुभवोऽस्मा
कं नीलादेरुपजायते॥किं नीलमिति वाक्यार्थस्यैवमुपपद्यते॥५३॥प्रत्यक्षतो वस्तु यद्वदे
वं सर्वस्य वस्तुनः॥नैव साधयितुं शक्यं क्षणिकत्वं कथंचन॥५४॥सति कुंभे न नाशोऽस्ति ना
शोऽपि न तदाश्रयः॥अस्ति चेत्पूर्ववद्धर्मी न नष्टः पूर्ववद्घटः॥५५॥रूपनाशस्य नाशश्चेदस्तु

जीवश्रुतं समाः॥५५॥ घटोऽनाशीति मत्पक्षः स च नैवं विहन्यते॥ न नाशो ह्रेति नेष्टारं गंतारमि
वतद्गतिः॥५६॥ यस्मिन्सत्येव यः सिद्ध्येन्निःसपाद्विसतं कथं॥ लक्षणार्थमिदं वाक्यं यस्मात्पूर्व
मुदाहृतं॥५७॥ विशेषणाश्रयान्नातः अन्यं तात्र प्रसज्यते॥ विशेषणत्वेप्येतेषां लक्षणार्थत्वमात्म
नि॥ लक्ष्येऽसति न तादर्थ्यं सत्यादीनां प्रसज्यते॥५९॥ अतो लक्षणवाचित्वान्न अन्यार्थमिदं वचः॥
विशेष्यत्वेपि नैवं स्यान्स्वार्थसंसर्गकारणात्॥६०॥ स्वार्थसंसर्गिनसत्यादेर्विशेष्यार्थनियंतृता॥ नियं
म्यार्थनियंतृत्वं स्वार्थस[illegible]त्यक्र पपद्यते॥६१॥ स्वेनार्थेनार्थवांश्चात्र ब्रह्मशब्दः सहेतरैः॥ तत्रानंतोत
वद्वस्तु व्यावृत्येव विशेषणं॥६२॥ स्वार्थार्पणप्रनाड्या च परिशिष्टो विशेषणं॥ तद्विरोध्यर्थसंसर्गः सा
मर्थ्यात्स्यान्न शब्दतः॥६३॥ गुहायां निहितं यस्मादेतस्मादात्मनस्तथा॥ ब्रह्मात्मशब्दयोस्तस्मादैका
र्थ्यमवसीयते॥६४॥ विज्ञानात्मातिरेकेण ज्ञाप्यं ते ब्रह्म चेत्परं॥ नियोगगम्यः सन्नभेदो वदकेन निवार्य
ते॥६५॥ न चेदात्मा परं ब्रह्म स्वतः स्याद्दस्य दुःखिनः॥ नियोगो वानियोगो वा किं विशेषं करिष्यति॥६६॥

पत्त्ययतः प्रत्यगात्मानमपविज्ञान्यवस्तुनः ॥ अहं ब्रह्मेति चेज्ज्ञानं शास्त्रादन्यपरं कथं ॥६७॥ अ
त्मनोन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः ॥ अनात्मत्वेस्य किं तेस्या दात्मत्वे त्वन्यधीर्हुतिः ॥६८॥ यत्सा
क्षादिरूपकम्प्यय आत्मस्वरूपसंहृतेः ॥ अन्योन्यार्थसमा प्रश्न्यतिरेकेव संभवात् ॥६९॥ आ
त्मैव चेत्परं ब्रह्म भवताभ्युपगम्यते ॥ आत्मनो ज्ञानकर्तृत्वात् ज्ञानं स्यात्तत्कर्तृसाधनं ॥७०॥ पारतं
त्र्यमनित्यत्वं धात्वर्थत्वे प्रसज्यते ॥ तर्कशास्त्रप्रसिद्धेश्च कर्तृत्वं वात्मनो भवेत् ॥७१॥ उच्चैर्बाह्यं मुख्य स
त्य इत्याहुः श्रोत्रचक्षुरः ॥ यथोदितमिदं सर्वं नैतदेवं भवेत्कुतः ॥७२॥ स्वरूपाव्यतिरेकेपि कार्यत्व
मुपचारतः ॥ बुध्युपाश्रयकार्याणि कल्प्यंते त्वाविवेकिनः ॥७३॥ स्वरूपमात्मनो ज्ञानं न तस्माद्व्यति
रिच्यते ॥ बुद्धेः प्रत्ययकारित्वं तत्साक्षिण्युपचर्यते ॥७४॥ आत्मचैतन्यसंव्याप्तावृत्तीर्धीः कुरुते यतः ॥
चैतन्यालिंगिताः सर्वास्तस्मायो विस्फुलिंगवत् ॥७५॥ चैतन्यरवचितान्दृष्ट्वा प्रत्ययान्बुद्धिकर्तृ
कान् ॥ ज्ञानं क्रियेत इत्यज्ञाः कूटस्थमपि मन्वते ॥७६॥ आविर्भावतिरोभावौ बुद्धेर्यत्साक्षिकौ नृणां ॥

लविशेष्यस्त्वमगृहीतविशेष्यकं॥ सजातीयान्निराकर्तृ विशेषणमिहोच्यते॥३५॥ सामा
न्येतरसंयुक्तमनेकगुणसंयुतं॥ संभव्यसंभविगुणं विशेष्यं तदिहोच्यते॥३६॥ विशेष्यांतरशेषं
यत्स्वविशेष्यान्यबुद्धिकृत्॥ परिकल्पितसंबंधं लक्षणं भावलक्षणं॥३७॥ निरस्यति यथैवैकं
तथैवान्यद्विरोधियत्॥ स्वात्मनैवैकरूपेण लक्ष्यमत्र निगद्यते॥३८॥ स्यादयः परार्थत्वादि
तरेतरनिस्पृहाः॥ एकैकस्त्वत एवैषां विशेष्यार्थे न बध्यते॥३९॥ सकृत्स्रमिरूपाद्यद्रूपमन्य त
त्कदाचन॥ नैव प्रपद्येत सर्वं तस्यात्कार्यविलक्षणं॥४०॥ यावान्कश्चिद्विकारोत्र ब्रह्मतस्मान्नि
वर्तितं॥ भजते कारणात्वं तत्तथा च चैतन्यधर्मकं॥४१॥ तद्दोषदृष्ट्यनुस्यूतं ज्ञानं ब्रह्मेत्युदीर्यते॥ अ
नेकार्थाभिसंबंधात्किमर्थं ज्ञा न मुच्यते॥४२॥ ब्रह्मणो भेदकं यस्मादानंत्ये न च संगतः॥ ज्ञप्तिर्ज्ञानमि
तिन्याय्यमन्यथा दोषदर्शनात्॥४३॥ तस्मात्सर्वमनंतं यज्ज्ञानं तदिह गृह्यते॥ भावसाधनमेवातः स्या
दतद्धात्क्तिदर्शनात्॥४४॥ ज्ञानं ब्रह्मेति वचनादंतवत्त्वमवापतत्॥ ज्ञानस्य लौकिकस्येहत्यंतवह

र्त्ततेनिवृत्तंच निर्वंशरूपकथयाम्यहं ॥८४॥ तस्माद्दासन्नकर्तृत्वतिमिरोयमविद्यया ॥ ससादिलक्ष
णंब्रह्मप्रत्यक्स्थमपिनेक्षते ॥८५॥ अतोविद्यानिषेधेनसदाविस्फारितेक्षणः ॥ पिवनुज्ञात्रादिनाना
त्वंप्रत्यगात्मानमीक्षते ॥८६॥ एतमात्रोपसंश्लेषसमुत्थंयतआत्मनः ॥ कर्तृभोक्तृत्वविज्ञानंबुद्धौतन्नि
हितंततः ॥८७॥ तमोरजोविनिर्मुक्तस्तद्बुद्ध्याचोपलभ्यते ॥ ब्रह्मातोनिहितंबुद्धौमनसेवेतिचश्रुतिः ॥
॥८८॥ निगूढमस्यांतद्ब्रह्मकामाविद्याद्युपप्लवात् ॥ प्रत्यग्धियोनुपश्यंतितस्माद्बुद्धिर्गुहोच्यते ॥८९॥
परमंब्रह्मव्योमहार्दस्याद्व्याद्याच्चपरमंयतः ॥ श्रुतेर्यंबहिर्द्धितत्तद्बुद्धेःसमाश्रयं ॥९०॥ गुहायांपरमे
व्योमन्वस्तत्वृत्तमपेक्षया ॥ सत्यादिलक्षणान्नान्यद्धियःप्रत्यक्प्रतीयते ॥९१॥ सत्याद्यर्थविरुद्धे
भ्यःसम्यग्व्यावृत्तधीर्यतिः ॥ धियःप्रत्यक्प्रविश्याथसत्यात्मानंप्रपश्यति ॥९२॥ तस्माद्दुपायसि
द्ध्यर्थंबुद्धेःप्रत्यक्प्रवेशनं ॥ गुहायांपरमेव्योमन्श्रुतिरस्मान्नतोऽन्वशात् ॥९३॥ ज्ञातुर्ज्ञेयंपरं
ब्रह्मभेदंबुध्यपनुत्तये ॥ गुहायांपरमेव्योमन्ज्ञेयंज्ञातरिशिष्यते ॥९४॥ साध्यसाधनसंबंधवर्ज

नैवानुधावतः॥ साध्यसाधननिर्मुक्तं स्वात्मन्याविशते परं॥९९॥ सोऽश्नुते निखिलान्कामान्कर्तुं
हेतदसंभवं॥ आशंक्य ब्रह्मणोत्याह युगपत्स्यात्सहेति च॥१००॥ प्रतीचि न स्यात्तद्ब्रह्मभेदार्थो ह्ये
सहर्थता॥ संभाव्यते पराग्भूतं नापि सत्यादिमत्परं॥१॥ नापि नोत्सहते वक्तुं निपातत्वात्सहार्थतां॥
तस्माद्युगपदर्थस्य वाचकं स्यात्सहेति यत्॥२॥ ज्ञानादसत्याद्युच्छित्ते रात्मनोन्यन्न विद्यते॥ तस्मा
द्विपश्चिद्ब्रह्मभ्यां कामान्सर्वान्सहाश्नुते॥३॥ ज्ञातुर्हार्दे गुहांतस्थं प्रतीचोन्यन्न लभ्यते॥ सत्यादि
मद्यतो ब्रह्म प्रत्यगात्मैव तद्विदः॥४॥ विपश्चिद्व्यतिरेकेण ज्ञेयत्वाद्युपपत्तये॥ सामानाधिकरण्येन ब्र
ह्मणाह विपश्चिता॥५॥ एकया क्रमवर्त्तिन्या व्याप्नोति क्रमवर्त्तिनः॥ अवगत्याखिलान्कामान्यो
काम इति च श्रुतिः॥६॥ आदावंते तथा मध्ये धियो नेकशरीरगाः॥ निर्विशेषैकचिद्व्याप्यात्यनन्या
नुभवात्मना॥७॥ सर्वप्रवृत्तिहेतुंश्च यस्माद्ब्रह्मविदश्नुते॥ कामान्ब्रह्मविदस्तस्मान्न प्रवृत्तिरहेतु
तः॥८॥ अविद्याहेतवः कामाः काममूलाः प्रवृत्तयः॥ धर्माधर्मौ च तन्मूलो देहोनर्थाश्रयस्ततः॥९॥

अतोविधानिरोधेस्यान्निरोधोविदुषःसदा॥ निःशेषकर्महेतूनांविकाराणांततेवतु॥१०॥ कृत्स्नो
पनिषदर्थस्यसूत्रमिसुभ्यथासुरा॥ संक्षेपतस्तदर्थश्चसम्यङ्मंत्रेणवर्णितः॥११॥ अनेन
त्वाद्यसूत्रेणयावानर्थोत्रसूत्रितः॥ आसमाप्तेरियंवृत्तिस्तस्यादित्युच्यतेधुना॥१२॥ सत्यंज्ञान
मनंतंचरसादेःपंचकात्परं॥ स्याममदृश्यादिशास्त्रोक्तमहंब्रह्मेतिनिर्भयं॥१३॥ ननुसत्यमनं
तंचकथंसम्यक्प्रतीयते॥ देशकालादिहेतुत्वात्तदिदानींविभाव्यते॥१४॥ वस्तुतोदेशतश्चै
वकालतश्चत्रिधोच्यते॥ आनंत्यंब्रह्मणश्चातःसत्यादपिचसिध्यति॥१५॥ अनंतंदेशतोव्योम
देशावस्थकृतिहतः॥ कारणेनैकदेशंहिकार्यनान्यत्रवर्त्तते॥१६॥ कार्यत्वात्कालतोनास्यवस्तु
तश्चविहायसः॥ वस्त्वंतरस्यसद्भावादानंत्यंवस्तुतोपिन॥१७॥ कालाकाशादियोनित्वात्सर्वात्म
त्वात्तथात्मनः॥ वस्त्वंतरस्यजासत्वात्सुख्यानंत्यंपरात्मनः॥१८॥ कल्पितेनपरिच्छेदोनह्यकल्पि
तवस्तुनः॥ कल्पितश्चेहकालादिर्विचारंभणशास्त्रतः॥१९॥ तस्मात्सत्यादियाथात्म्यंतस्यादिहे

ततोन्यं कं समाश्रित्य साक्षिकर्तृत्वमुच्यते॥७७॥ बुद्धिभावानवच्छिन्नं तादृग्रूपं यथा पुरा॥ बु
द्ध्यसत्त्वावपि तथाविक्रियं ह्यनुभूयतां॥७८॥ कर्तृकार्यविभासित्वात्कर्तृकार्याभिधायिनः॥ लक्ष
यंति परं ब्रह्म नांजसा तत्प्रचक्षते॥७९॥ यत्तु तद्ब्रह्मणो ज्ञानं सर्वानन्यदविक्रियं॥ ब्रह्मणोऽव्यति
रिक्तं तत्सर्वप्रत्यक्समाश्रितः॥८०॥ प्रसंख्याताखिलानात्मभेदसत्त्वार्थवाचिना॥ तथैव सत्त्वश
ब्देन लक्ष्यते तन्न तूच्यते॥८१॥ एवं सत्यादयः शब्दाः स्वार्थासंसर्गिणः परं॥ लक्षयंति विरुद्धार्थनिवृ
त्त्याज्ञानहानतः॥८२॥ निवर्त्यभेदाद्भिन्नोर्थोऽसत्याद्यर्थनिवर्तिनां॥ सत्यादीनामतः सिद्धमवाक्यार्थ
त्वमात्मनः॥८३॥ यतो वाचो निवर्तंते नेति नेतीति चापरं॥ एवं सत्यर्थवत्सर्वमन्यथा तदनर्थकं॥८४॥ कौट
स्थ्यं सत्यमित्युक्तं तद्रूपं ज्ञानमुच्यते॥ स्वतो बोधस्य कौटस्थ्यं ज्ञातुरानंत्यमेकता॥८५॥ ज्ञानभेदाच्च त
द्ब्रह्म ह्यनीक्षिततमं परं॥ ज्ञातुरन्यस्य चाभावाद्बोवेदत्युच्यते कथं॥८६॥ सत्यादिलक्ष्याज्ञानोत्थाऽसत्याद्य
र्थनिषेधधीः॥ वर्त्मनैवात्समाप्नोति केवलाज्ञानहानतः॥८७॥ एवं ज्ञानं विजानाति विमुक्तश्च विमुच्यते॥ निव

ना२ मि२

यतः ॥ कौटस्थ्याज्जन्मशानामनवस्थं जनेर्जनेः ॥३०॥ कालत्रयस्याविद्यायाः समुत्थाना
दहेतुता ॥ कर्मदैवेश्वरादीनामत एवानिवृत्तता ॥३१॥ जनिस्थितिलयप्रख्या ह्येते जगतः स्युः प्रतिक्ष
य णं ॥ धियाजनैतत्कर्तृकर्मभिश्चेति हि श्रुतिः ॥३२॥ अनाद्यमध्यनिधनाविद्यासंदूषितात्मनः ॥
ब्रह्मणो जायते व्योम तिमिरादिव चंद्रमाः ॥३३॥ नालं क्षणमपि स्थातुं कार्यं तद्ध्रुवता कुतः ॥ र
ज्ज्वेव भोग्यविद्योद्धमूढदृष्टेर्ध्रुवायते ॥३४॥ तिमिरोपप्लुतो यद्वद्भिन्नामिव समीक्षते ॥ चंद्रि
कामात्मनस्तद्वत्कार्यं भिन्नं समीक्षते ॥३५॥ यद्यद्भूतं यथा संख्यं तत्तत्तावद्गुणं स्मृतं ॥ एवं
व्याप्तानि कार्यत्वादुत्तराणि यथाक्रमं ॥३६॥ आकाशादेश्च कार्यत्वान्नवाद्यादि प्रजायते ॥
वियद्रूपान्मरुज्जन्म तस्मादात्मन एव तत् ॥३७॥ पंचैव खलु भूतानि व्योमादीन्युपलक्षयेत् ॥
कार्यकारणरूपेण भूतेभ्यो नान्यदिष्यते ॥३८॥ वाय्वादिषु तु यः शब्दः खस्थं तमविचक्ष
णाः ॥ वाय्वादीनामिवेक्षंते स्वगुणानिव भोगिनः ॥३९॥ चतुर्गुणात्मिका पृथ्वी न चतुर्विं

स्तायथा॥ ब्रह्मात्मकं जगत्सर्वं ब्रह्मैवं न जगन्मयं॥४०॥ सत्यं ज्ञानमनंतं यत्तत्स ज्ञायि पुरेकलं॥
अनन्यानुभवं ब्रह्म तत्सिद्धं न्यायतः स्फुटं॥४१॥ दिगादिकरणो देवः पंचभूतशरीरभृत्॥ सर्वे
ष्वभिमानेनासौ विराडेवमजायत॥४२॥ अस्मात्पूर्वं भवेत्सूत्रं तस्मिन्सति विराड्यतः॥ श्रुत्यंत
रानुरोधाच्च विज्ञानमिति लिंगतः॥४३॥ यच्चाप्योन्नमयादिभ्यो ह्यन्नं प्राणमितीरणात्॥ उपास
नोपदेशाच्च सूत्रमत्र विवक्षितं॥४४॥ कार्योपादानपुरस्सूत्रंमहत्तत्त्वसदविभागवत्॥ कारणंका
र्यमुत्पाद्य कार्यतामिव गच्छति॥४५॥ कार्ये सति तु तत्सूत्रं प्रज्ञानघनरूपभृत्॥ अवच्छिन्नं स्वका
र्येण समवच्छिव्यच्छितां व्रजेत्॥४६॥ वृष्ट्यादिसव्यपेक्षाया भुवः पंचगुणात्मिकाः॥ व्रीहिप्रभृ
तयः सर्वा भवंत्योषधयः क्रमात्॥४७॥ अदनार्हतयान्नं च ताभ्यः समभिजायते॥ जग्धाद
न्नाद्रसोत्पत्तिः शोणितं जायते रसात्॥४८॥ जायते रुधिरान्मांसं मेदसश्च ततो भवेत्॥ मेदसो
स्थीनि जायंते मज्जा चास्थिसमुद्भवा॥४९॥ ततः शुक्रस्य निष्पत्तिर्बीजं माजसृजा सह॥

निजाविद्यामहाजालसंवीतधिषणःपुमान्॥५०॥मोहोच्छानलकामाख्यबडिशापहृता
शयः॥तमसाकामशार्ङ्गेण संकल्पाकर्षितेन सः॥५१॥रागाख्यविषलेपेन ताडितोविषये
षुवा॥ग्रहाविष्टइवानीशश्चोदितोजन्यकर्मणा॥५२॥योषिदग्निंपतत्यार्त्तोज्योतिर्लोभात्प
तंगवत्॥आकृष्टदेहात्तदुःखंयथाकर्मयथाश्रुतं॥५३॥रेतोवहप्रनाड्याथयोनौपुंसानि
षिच्यते॥तस्ययोनौनिषिक्तस्यनिमित्तवशवर्त्तिनः॥५४॥जायतेकललावस्थाततोबुद्बुदरू
पिणी॥बुद्बुदाज्जायतेपेशीपेशीतोजायतेघनं॥५५॥घनादंगानिनिष्पत्तिःकेशरोमापिचांगतः॥
पूर्वजन्मानियान्यासन्भूतानिकरणानिच॥५६॥तान्येवेहापिदेहायतद्यथेतिश्रुतेर्बलात्॥
सर्वात्मनोप्यवच्छेदोविराजःसूत्रजन्मनः॥५७॥इयानस्मीतिसंमोहात्कामकर्मसमन्वे
यात्॥लिंगात्मकतयातद्वत्समष्टिव्यष्टिरूपिणः॥५८॥तदवच्छेदहेतोस्याद्व्यक्तस्य
सुषुप्तता॥परात्मनोप्यनंतस्यक्षेत्रज्ञहमविद्यया॥५९॥क्षेत्रज्ञंचापिमांविद्धीत्येवंसस

वमादिना॥ वक्ष्यते ब्रह्मणः सम्यक् सृष्टिव्याजेन यत्नतः॥२०॥ तस्मादिसादिवाक्योक्तं वै
शब्दः स्मरणाय तु॥ एतस्मादिति मंत्रोक्तं ससादिगुपालक्षितं॥२१॥ तद्विपर्य्ये सामर्थ्यात्त द्वि२
देतद्ब्रह्म प्रतीयते॥ आसभूतेर्न मुख्यार्थः प्रतीचोन्यत्र लभ्यते॥२२॥ मतः सर्वमिदं जातं म
य्येवांते प्रलीयते॥ अहमेको बिभर्मीदमिसेवं च प्रसिध्यति॥२३॥ सर्वानन्याविकार्येकमका
र्यकारणं परं॥ ब्रह्मस्वभावमालंब्य सृष्टिर्वक्तुं न शक्यते॥२४॥ ब्रह्मणोऽन्यदतः सर्वं कार्य
हेन विवक्ष्यते॥ ब्राह्मणोकारणात्वाच्च सृष्टेर्हेतोरसंभवः॥२५॥ ब्रह्मस्वभावो हेतुश्चेत्सृष्टेः
तत्संनिधेः सदा॥ सर्वदा ब्रह्मवत्सर्गो न च देशाद्यसंभवात्॥२६॥ नाभूत्सृष्टिरभूतत्वादभूतं का
ल हेतुतः॥ न भविष्यत्स्वभाव्यत्वादभाव्यं चाक्रियो हि ते॥२७॥ नेदानीमद्वितीयत्वात्कौटस्थ्या
दात्मनः सदा॥ भविष्यत्सस्य भूत्वातो वस्तुवृत्तमपेक्ष्यते॥२८॥ भविष्यत्सस्य भूत्वेति यतो वंध्य
विशेषणं॥ उद्गादिवदणोस्तस्माद्विघेवाद्य कारणं॥२९॥ असतः कारणं नास्ति स्वतो न तिश

जायते श्रवणेंद्रियं॥७०॥ परिशिष्टेषु चाप्येवमिंद्रिषूपधारयेत्॥ देहोत्पत्तिमनूत्पन्नो व्योमवत्
घटजन्मना॥७१॥ अस्यादयोप्यतो न स्युः सति जन्मनि ते यतः॥ यावद्यावदयं देहो वर्द्धते गर्भ
शायिनः॥७२॥ तावत्तावदभिव्यक्तिलिंगस्याप्यभिजायते॥ समग्रकरणस्याथ नवमे मासि देहि
नः॥७३॥ व्यतीतानेकजन्मोत्था व्यज्यंते वासनाः क्रमात्॥ आविर्भूतप्रबोधोसौ गर्भदुःखादिसंस्थि
तः॥७४॥ हा कष्टमिति निर्विण्णः स्वात्मानं शोशुचीत्यथ॥ अनुभूताः पुरासह्या मया मर्मच्छिदोस
ह्यत्॥७५॥ करंभवालुकास्तप्ता यादहं सत्शुभाशयात्॥ जाठरानलसंतप्ताः पित्ताख्यरसविप्रु
षः॥७६॥ गर्भाशये निमग्नं तां दहंत्यतिभृशं तु मां॥ उदर्यक्रिमिवक्त्राणि कूटशाल्मलिकंटकैः॥
॥७७॥ तुल्यानि वितुदंत्यार्त्तं पार्श्वास्थिक्रकचार्दितं॥ गर्भे दुर्गंधभूयिष्ठे जाठराग्निप्रदीपिते॥७८॥
२म दुःखं मयाप्तं यत्तस्मात्कनीयः कुंभिपाकजं॥ पूयासृक्श्लेष्मपायित्वं वांताशित्वं च यद्भवेत्॥७९॥
असुचौ क्रिमिभावश्च तत्प्राप्तं गर्भशायिना॥ गर्भशय्यां समारुह्य दुःखं यादृङ्मयापितत्॥८०॥

नातिशेते महद्दुःखे निःशेषनरकेषु यत्॥ अस्थियंत्रविनिष्पिष्टः परीतः कुक्षिवर्त्मना॥८१॥
क्लेदासृग्दिग्धसर्वांगो जरायुपटसंवृतः॥ निःक्रामनूभूतं दुःखात्तैस्तंदुचैरधोमुखः॥८२॥
यंत्रादिव विनिर्मुक्तः पतत्युत्तानशाय्यधः॥ अकिंचित्स्तदा बालो मांसपेशीसमस्थितः॥८३॥ श्व
मार्जारादिदंष्ट्रिभ्यो रक्ष्यते दंडपाणिभिः॥ पितृवद्राक्षसं वेत्ति मातृवड्डाकिनीमपि॥८४॥ पूयं पयोव
दश्नाति धिक्कष्टं पापिनां हि शैशवं॥ ततोऽथ यौवनं प्राप्य मन्मथज्वरविह्वलः॥८५॥ गायत्यकस्मा
द्दुद्दैः स तथाकस्माच्च वल्गति॥ आरोहति तरुं वेगाच्छांतानुद्वेजयत्यपि॥८६॥ कामक्रोधमदांधः सन्न
किंचिदपि वीक्षते॥ महापरिभवस्थानं जरां प्राप्याथ दुःखितः॥८७॥ श्लेष्मणा पिहितोरस्कोऽजग्धमन्नं
न जीर्यति॥ भग्नदंतो भग्नदृष्टिः कटुतिक्तकषायभुक्॥८८॥ वातभुग्नकटिग्रीवकरोरुचरणोऽबलः॥
गदायुतः समाविष्टः परिभूतः स्वबंधुभिः॥८९॥ निःशौचो मलदिग्धांग आलिंगितधरोषितः॥ कास
धो वायुमुरजासितश्मश्रुकचांबरा॥९०॥ श्वासोच्छ्वसनवंशा च जाठराग्निगेयिका॥ वलीपलित

वर्द्धयंवरकंचुकधारिणी॥९१॥दंडतृतीयपादेयंप्रस्खलंतीमुहुर्मुहुः॥अग्निपाकिकरुक्माघा २०
सूक्ष्मत्वकूपटसंवृता॥९२॥गुल्फजान्वास्थिसंघर्षचलन्नूपुरघोषणी॥प्रज्ञांमेधांधृतिंशौर्यं
रूनांजगधाबलंतथा॥९३॥हृतार्थैवप्रहर्षेणजरायोषिद्व्रजस्पति॥ततोपिमृतिदुःखस्यदृष्टां
तोनोपलभ्यते॥९४॥यस्माद्बिभ्यतिभूतानिप्राप्तान्यपिसंसृजं॥ह्रियतेमृत्युनाजंतुःपरि
ष्वक्तोपिबांधवैः॥९५॥सागरांतर्जलगतोगरुडेनेवपन्नगः॥हाकांतेहाधनंपुत्राःक्रंदमानः प
सुदारुणं॥९६॥मंडूकइवसर्पेणगीर्यतेमृत्युनानरः॥मर्मसुच्छिद्यमानेषुमुच्यमानेषु
सं धिषु॥९७॥यत्दुःखंम्रियमाणस्यस्मर्यतांतन्मुमुक्षुभिः॥दृष्टावाक्षिप्यमाणायांसंज्ञ
याह्रियमाणया॥९८॥मृत्युपाशेनबद्धस्यत्रातारंनोपलभ्यते॥संरुध्यमानस्तमसामह
च्छ्भ्रमिवाविशन्॥९९॥उशोघ्नतस्तदाज्ञातीन्दृष्ट्वासेदीनचक्षुषा॥अयःपाशेनकालेनस्ने
हपाशेनबंधुभिः॥४००॥आत्मानंलक्ष्यमाणंत्वमभितोदृश्यसेतदा॥हिक्किकाबाध्यमानस्यश्वा

रूपपद्यते॥ न जानामि यविद्यैकानित्यात्तत्कारणं मता॥६०॥ स्वप्रसिद्ध्यै वसासिद्ध्ये न्हि शौलू
कीववासरे॥ प्रमाणोत्पन्नया दृष्ट्या यो विद्याद्रष्टुमिच्छति॥६१॥ दीपेनासौ ध्रुवं पश्येत्गुहाकुक्षि
गतं तमः॥ अनात्मेतीह यज्ज्ञातितद्विद्याविज्रंभितं॥६२॥ तस्या दविद्यासाप्युक्ताविद्या बाल्मेव
करूपिणी॥ आत्मग्रहातिरेकेण तस्या रूपं न विद्यते॥६३॥ अस्मिज्ञादिवदविद्येति सत्येवं घटतेस
दा॥ तस्मात्सदसद्विद्यादिविकल्पो मूढचेतसां॥६४॥ निरूप्यमाणो निर्वाति नवेद्मी यग्रहात्मनि॥
तयासंवीत चित्तोयं येत्काद्देहंपुरातनं॥६५॥ लिंगात्मा प्रविशेद्योनिं कर्मादिमरुतेरितः॥ अन्ने
मेभस्तथा तेजो नुक्रं प्रसेक शत्रिधा॥६६॥ त्रि[illegible]तं तदेकैकं परिणामं प्रपद्यते॥ पुरीषमांसबु
९ ध्येशे मूत्रासृक्प्राराशिभिः॥६७॥ तथास्थिमज्जावाग्भागे रत्नात्पेजांसिकालतः॥ मनो बुद्धींद्रिया
णां स्यात्कर्मशक्तेश्च भारती॥६८॥ प्राणाश्च प्राणभेदानामुपलक्षणसिद्धये॥ कर्मेच्छभावनाभि
स्त्को वा द्यते यच्चंदी ढियं॥६९॥ जायते तदहंकाराद्यथा कर्म यथाश्रुतं॥ श्रोतास्मी यभिमानादि

स्मीति च मन्यते॥ श्यामोस्मीति च देहस्य श्यामत्वं मन्यते बुधः॥१२॥ गोधनाद्यभिमानेन तद्वान
स्मीत्यविद्यया॥ ब्रह्मचारी गृहस्थोहं तापसोस्मि तथा मुनिः॥१३॥ लिंगदेहात्मसंस्कारान्मन्यते
संगकारणात्॥ भिन्नात्मनां तु भूतानां शरीरं कार्यमुच्यते॥१४॥ ममाहमिति संमोहादनर्थं प्र
तिपद्यते॥ सर्वेषां चान्नकार्यत्वे ब्रह्मजत्वे समे तथा॥१५॥ कर्मज्ञानाधिकारित्वात्सुमाने वेहग
ह्यते॥ अनेकानर्थनीडेस्मिन्निमग्नं ब्रह्मविद्यया॥१६॥ संक्रामयितुमिच्छत्वाद्ब्रह्मांतरतमं न
रं॥ तरुशाखाग्रदृष्ट्येव सोमं यद्वत्प्रदर्शयेत्॥१७॥ निःकोशं कोशदृष्ट्येवं प्रतीचि ब्रह्म द
र्श्यते॥ अनादाविह संसारे वासनारंजिता मतिः॥१८॥ प्रतीच्युपायतः कर्तुं शक्यात स्मात्स
उच्यते॥ द्वेतास्पृक् प्रत्यगात्मैकः प्रतीचीव परागपि॥१९॥ युष्मदस्मद्विभागाभ्यां भिद्यतेऽवि
द्यया मृषा॥ अस्मद्विभागे पंचास्य यथैवान्नमयादयः॥२०॥ तथा तत्प्रत्यगात्मानो युष्मद्यन्ना
दयः स्मृताः॥ आध्यात्मिकान्विलाप्याथ यथास्वं प्रत्यगात्मसु॥२१॥ अन्नादीन्यर्युपासीत तत्तत्तरोत्तर

रूपगान्॥ अगंध्याकार्यात्मतामेवं कारणात्मतया स्थितः॥२२॥ आत्मनालिंगितो ब्रह्म वा काप्यज्जगंध्या
चतामपि॥ अन्नं विराडिति ज्ञेयं प्राणात्तदभिवर्द्धते॥२३॥ ऋग्यजुःसामरूपो तो वेदात्मा तन्मनो
मयः॥ वेदार्थविषया बुद्धिर्विज्ञानं निश्चयात्मकं॥२४॥ ज्ञानकर्माभिनिर्वृत्तः आनंदः फलल
क्षणः॥ त्रीण्येवान्नानि चैतानि प्राजापत्यानि सर्वशः॥२५॥ प्राणो मनस्तथा वाक्च विराडन्नात्मतां
गतः॥ चतुर्णां प्रत्यगात्मैव मानंदमय उच्यते॥२६॥ प्रज्ञानघनरूपत्वात्स्याद्देदोपस्य कार्य
तः॥ शिर आदिप्रकॢप्तिस्तु स्यादुपासनकर्मणे॥२७॥ तस्मादेवं चितीरेता मानसीर्व्यचिच
क्षिरे॥ शिरो मूर्द्धा भुजौ पक्षौ आत्माकायश्च मध्यमः॥२८॥ शेषं पुच्छमिति ज्ञेयं चितिमेवं विचि
तयेत्॥ उपासीनश्चितीरेवं विद्वानेतायथाक्रमं॥२९॥ पूर्वपूर्वप्रहाणेन स्वेतरं ततः प्रपद्यते॥ अतेर
नतिशंक्यत्वात्संभाव्येत यथोदितं॥३०॥ लिंगप्रत्यक्षगम्ये हि स्यादाशंकानबुद्धितः॥ स्वभावतो
वासंप्राप्तमनूद्योपासनं श्रुतिः॥३१॥ नामादाविव भूमानं विधत्ते ज्ञानमात्मनि॥ असंत्तराद्धासंप्राप्तं

मोक्षादर्वाक्फलायतु ॥३२॥ तदन्नूध परं श्रेयः प्राप्तये ज्ञानमुच्यते ॥ ब्रह्मविद्योडुपेनैवं को
ज्ञानर्थमहोदधेः ॥३३॥ निनीर्षंतीपरं पारं सवाइ सभ्यध्याय था ॥ मूलात्मानं स शब्देन स्पृष्ट्वात
स्मृतयेथवे ॥३४॥ कोशात्मतां समापन्न एष इत्यभिधीयते ॥ अविद्यया देहोपि रज्जुसर्पा
त्मतामिव ॥३५॥ कोशपंचकतां यातः तमनुक्रोशतीवहि ॥ मयडत्र विकारार्थो निषिद्धो सौ परा
त्मनः ॥३६॥ युत्तयागमाभ्यामन्नस्य कार्यं देहः प्रतीयते ॥ इदमेव शिरस्तस्य माभूद ध्यासलक्षणं ॥३७॥
प्राणकोशवदेवेति तस्मादेवावधार्यते ॥ विराड्डिंडात्मनोरैक्यं श्रुतसंतरवशादिह ॥३८॥ उपासनोपदेशाच्च
जानीयात्पिंडदेवतां ॥ विराडात्मकतां याते पिंडे ध्यात्मावसायिनि ॥३९॥ प्राणो वाद्यात्मतामेति प्रध्वस्त
घटदीपवत् ॥ विद्यादन्नमयेनैव मूषायां द्रुतताम्रवत् ॥४०॥ सर्वान्प्राणमयादीस्तान् रवितान्पुरुषाकृती
न् ॥ यथोदितात्तुवादीतु श्लोकोप्यत्र निगद्यते ॥४१॥ ब्राह्मणोक्तार्थविज्ञानदार्ढ्यहितकाम्यया ॥ अन्ना
द्वै प्रजाः सर्वा जायंते न्नेन बृंहिताः ॥४२॥ वर्द्धंते त्वन्नमेवैताः प्रविलीयंति सर्वशः ॥ भूतेभ्यः पूर्वनिष्प

सेनेंश्रुष्यतः ॥१॥ कृष्यमाणस्य पाशेन न खल्वस्ति परायणं ॥ संसारयंत्रमारूढो यमदूतैरधिष्ठितः ॥२॥
न२ क्व यास्यामीति दुःखार्त्तः कालपाशैर्योजितः ॥३॥ माता पिता गुरुः सुतः स्वजनो ममेति मायोपमे जगति क
स्य भवेत्प्रतिज्ञा ॥ एको यदा व्रजति कर्मपुरःसरोयं विश्रामवृक्षसदृशः खलु जीवलोकः ॥४॥ सायं
सायं वासवृक्षं समेताः प्रातः प्रातस्तेन तेन प्रयांति ॥ [illegible] त्यक्त्वान्योन्यं तं च वृक्षं विहंगा यद्वत्तद्वज्ज्ञा
तयो ज्ञातयश्च ॥५॥ मृतिबीजं भवेज्जन्म जन्मबीजं तथा मृतिः ॥ घटीयंत्रवदश्रांतो बंभ्रमीत्यनिशं न
रः ॥६॥ कृपर्जन्यधरामर्त्ययोषिदग्निषु दैवतैः ॥ श्रद्धेंदुराजवर्षान्नरेतआख्यं हविर्हुतं ॥७॥ पंचम्या
माहुतावेवं पुंवाचो जायते पुमान् ॥ कृमात्तस्य महानर्थसंसृत्युच्छित्तिरुच्यते ॥८॥ इत्याद्या विक्रियाः
सर्वा लिंगदेहसमाश्रयाः ॥ अतद्धानपि संमोहात्तद्वानित्यभिमन्यते ॥९॥ ज्ञातास्मीत्यभिमानाद्धि
चेष्टते ज्ञानकर्मणि ॥ मंतास्मीति तथा मोहात्कुरुते मानसीः क्रियाः ॥१०॥ प्राणाद्यात्माभिमानेन
कर्मचेष्टां प्रपद्यते ॥ चक्षुराद्यभिमानी च रूपाद्यालोचनापरः ॥११॥ तथा देहस्य दाहादौ दग्धो

र्थः समर्थितः॥ यथोक्तान्नमयादस्मादन्यः स्यात्तद्विलक्षणः॥५४॥ अंतरः प्रत्यगेसेतदात्मा चा
त्मसमन्वयात्॥ कोशैश्चतुर्भिः संव्याप्तो यथैवान्नमयः पुरा॥५५॥ ज्ञानीयादुत्तरानेवं त्रिष्वेकार्थसमन्व
यात्॥ तेन प्राणमयेनैष पूर्णो रज्ज्वेव पन्नगः॥५६॥ कार्यतोऽन्नमयः कुम्भो वाचारम्भणशास्त्रतः॥ सर्वे
पुरुषविधो ह्युक्तो योऽयं प्राणमयः स्मृतः॥५७॥ अमूर्त्तत्वात्कुतोऽन्वेतद्धेतुस्तस्येति भण्यते॥ प्राणस्तस्य
शिशिर श्रैष्ठ्यात्प्राणो यस्मान्मुखालयः॥५८॥ व्यानोऽस्य दक्षिणः पक्ष उत्तरोऽपान उच्यते॥ सामा
न्यं वीर्यवत्त्वास्यादितरस्यात्तथात्मता॥५९॥ आकाश इति चात्रस्या समानो वरसाम्यतः॥ प्राणानां
तत्स्वतिष्ठानादात्मासौ श्रुतितो भवेत्॥६०॥ पृथिवी देवता पुच्छं सैषेति श्रुतिदर्शनात्॥ असोराध्या
त्मिकास्येषा स्थितिहेतुः प्रकीर्तिता॥६१॥ अनात्मनीवेहाप्याह श्लोकं प्राणमयात्मनि॥ प्राणं प्राणं
तमन्वेव देवाः प्राणंति नः स्वतः॥६२॥ वर्षसीह यदेवत्वमपीमाः प्राणते प्रजाः॥ मनुष्याः पशवोऽन्येच
प्राणांस्तत्सु समाश्रयात्॥६३॥ अध्यात्ममधिदैवं च करणान्यधिदेवताः॥ प्राणास्वरूमापद्यजहुम्
प

स्मिति श्रुतिः॥६४॥ घट तेषामिदं सर्वं सर्वस्यायुर्यतो ह्यसौ॥ तस्मात्त्वं तद्विदः प्राहुः सर्वायु
षमनेकशः॥६५॥ सर्वायुषगुणो नाम सु य आत्मानमुपासते॥ ते तं सर्वायुषं प्राणं प्राप्नुवंत्यभियोगतः॥६६॥
तस्य तन्नमयः स्येषयो यं प्राणमयः स्मृतः॥ स्तवः शारीर शारीर आत्मा तेनात्मवान्यतः॥६७॥ ससादिलक्षणो वा
स्मा गौणो ह्यात्माऽमुतो परः॥ सर्वांतरत्वान्याय्यैवं यः पूर्वस्येति हि श्रुतिः॥६८॥ मिथ्यात्मनां हि सर्वेषां सत्यादि
गुपालक्षणं॥ व्याविद्धाशेषसंसारं आत्मानं तं प्रचक्ष्महे॥६९॥ न ह्यात्मवाननुभवेत्सर्पो दंडाद्यो ध्या
सरूपिणा॥ आत्मनावितथेनैव सर्पो रज्ज्वात्मनात्मवान्॥७०॥ प्राणाध्येवेत्येतो न्यायाद्दृश्यमापाश्रि
तीरितान्॥ व्युत्थाप्यान्नमयं तु चं प्राणोस्मीति व्यवस्थितः॥७१॥ यस्त्वं मनोमयात्मानं संज्ञामयितु
मुच्यते॥ तस्मादित्यादिवाक्यस्य तत्वर्थं पूर्ववदाविषं॥७३॥ प्राधान्यं यजुषो ज्ञेयं हविःप्रक्षेपकारणात्॥
स्वाहा स्वधा वषट् चेति सन्निपात्योपकुर्वते॥७४॥ शिर आदिप्रकृप्तिस्तु वाच निवपथेवास्तिह॥ वचनं
बलवद्यस्मात्सौरुषेयी हि कल्पना॥७५॥ पदवाक्य[illegible] स्वर स्थाननादवर्णादिसंयुता॥ यत्रोच्छ

मानसीवृत्तिर्यजुः संकेतवर्त्मना ॥७६॥ घाऐश्वरज्ञानसंदृब्धा पदवाक्यानुरंजिता ॥ श्रोत्रादि
करणद्वारस्थाय यजुरित्यभिधीयते ॥७७॥ ज्ञानात्मत्वे हि मंत्राणां घटते मानसो जपः ॥ ज्ञानस्या
शब्दरूपत्वात् ऋगावृत्तिर्न सिध्यति ॥७८॥ अशक्यत्वान्न चावृत्तिर्घटादेरिव शक्यते ॥ आ
वृत्तिश्चोद्यते चर्च्चां श्रुतौ त्रिः प्रथमामिति ॥७९॥ अथर्वो विषयत्वेपि स्मृतेरावृत्तिरिष्यते ॥ अ
गर्थविषयायाश्च नैवं गौणी हि सा भवेत् ॥८०॥ भूयोल्पीयः फलत्वं च बाह्यमानसयोर्जपे ॥
अतो मानसमुख्यत्वमितरस्यास्तु गौणता ॥८१॥ नात्मानं लभते गौणी मुख्याभावे सति कल्पना ॥
तस्मादीश्वरविज्ञानं यजुः स्याद्बुद्ध्युपाश्रयं ॥८२॥ एवं च सति नियतत्वं वेदानां घटतेञ्जसा ॥ वाचक
त्वमशब्दस्य सिद्धं न स्फोटरूपतः ॥८३॥ सर्वे वेदाश्च यत्रैकं भवंतीति श्रुतेर्वचः ॥ आदेशो ब्राह्म
णं विद्याद्यस्यास्य विधिरूपभृत् ॥८४॥ ब्रह्मणो वा परस्येयं माया ब्राह्मणलक्षणा ॥ तस्मादादेश इत्येवं ब्रा
ह्मणं संप्रचक्षते ॥८५॥ अथर्वांगिरसाभ्यां ये दृष्टा पुष्ट्यादिकारिणः ॥ एत एव हि मंत्राः स्युरथर्वांगिरसो जकुः ॥८६॥

तेऽर्थेष्वमन्नं विराड्भवेत् ॥४३॥ स वै शारीरी प्रथमस्तया पौरुषिकी स्मृतिः ॥ घोषणादग्निशेषस्याज्ञातन्तु
ष्यति येन सः ॥४४॥ धानात्तस्यान्नतत्त्वज्ञैरौषधं शक्ष्यते सदा ॥ सर्वेषां जाठराग्न्याख्यं वत्सं चोष्यादिभि
स्तनैः ॥४५॥ अन्नगोऽदीयते यस्मात्सर्वौषधमतो भवेत् ॥ उद्भूतिस्थितिहानिभ्यो जगतोऽन्नं हि कारणं ॥४६॥
कार्यस्य कारणाद्ब्रह्म तद्ये नित्यमुपासते ॥ आप्नुवन्त्यखिलं तेऽन्नमध्यासं देवतात्मना ॥४७॥ सेषा विरा
डितिह्युक्तमन्नात्मत्वं हि लौडके ॥ कार्यं सर्वं यतो व्याप्तं कारणेनात्तरूपिणा ॥४८॥ इति हेतूपदेशाय त्वन्नं
हीत्युच्यते पुनः ॥ अद्यतेऽन्नं प्रधानत्वाददितित्वात्तथात्ति च ॥४९॥ अन्नान्नादत्वहेतोस्तदन्नं हीत्युच्यते
बुधैः ॥ आप्नोति सर्वकार्याणि कारणात्मतया विराट् ॥५०॥ ततोऽप्येतः प्रवेशाय तस्मादित्यभिधीयते ॥ वेश
ब्देनैव संस्मार्यदवीयो देशवर्त्तिनं ॥५१॥ तस्माच्छब्देन वै राजमादायाध्यासरूपिणः ॥ एतस्मादिति श
ब्देन वै राजहं प्रबोध्यते ॥५२॥ कार्याणां कारणात्मत्वमेवं स्यादुत्तरे ह्यपि ॥ ब्रह्मात्मं तं भवेदेवं साख्यारा
द्भूतमन्यथा ॥ पूर्वकार्यातिरेकेणास्यात्मनात्रान्वयोक्तितः ॥५३॥ अन्वयव्यतिरेकाभ्यां यथोक्तो

व्याचष्टे तन्महद्ध्यक्षं श्रुतिः प्रथमजं तु यत् ॥ ९६ ॥ विज्ञानं तनुते यज्ञं कर्माण्यन्यानि यानि
च ॥ सर्वे च देवा विज्ञानं ब्रह्म ज्येष्ठमुपासते ॥ ९७ ॥ परमेव हि तद्ब्रह्म बुद्धिकंचुकमप्य स्वयं ॥
घटा[illegible]दाविव विज्ञस्तोऽधीरात्मानं तत्तोऽर्पयेत् ॥ ९८ ॥ अग्रजं ब्रह्म विज्ञानं देवा अग्न्यादयः
सदा ॥ उपासते तदाऽस्पर्धे ते देवा इति च श्रुतिः ॥ ९९ ॥ यथोक्तेन प्रकारेण विज्ञानं ब्रह्म वे
द चेत् ॥ प्रमाद्यति न चेत्तस्मादुक्तो शास्त्रसक्तितः ॥ १०० ॥ पाप्मनामाश्रयो यस्माद्रूप
नामक्रियात्मकः ॥ देहो तस्मात्प्रहाणे न हानिः स्यात्सर्वपाप्मनां ॥ १ ॥ विज्ञानमहमस्मी
ति तावन्मात्राभिमानतः ॥ शरीरे पाप्मनो हित्वा सर्वान्कामान्समश्नुते ॥ २ ॥ अणिमा
दिगुणैश्वर्यैर्बुध्यात्मा कार्यतः पिपाः ॥ कार्यं हि कारणं व्याप्तमतः कामान्समश्नुते ॥ ३ ॥
ज्ञानकर्मफलोपाधि विज्ञानं प्रसगात्मनः ॥ आनंदमय इस्तत्र भण्यते कर्तृशांतये ॥ ४ ॥ विज्ञान

मयशब्देन कर्त्ता व्याख्यायि पूर्वया ॥ तस्य प्रयुक्तया चाथ श्रुसा प्रोक्तोच्यते धुना ॥५॥ प्रवृद्धस्यापि स्वतो
वृद्धौ प्रियाद्याकारतो दयो ॥ जायेते तद्रुपाधिर्वाज्ञात्मा स्यादविद्यया ॥६॥ अपरे पंडितंमन्याः परमेतं
प्रचक्षते ॥ इहैवोपरमादूर्ध्वं भृगोश्च वरुणस्य च ॥७॥ अपि चानंदरूपस्य ब्रह्मत्वं बहुशः श्रुतं ॥ त
थाचानंदवल्लीति व्यपदेशोपि युज्यते ॥८॥ कार्याधिकरणत्वात्तु नेतद्ब्रह्म परं भवेत् ॥ अन्नादिमयव
च्चकार्यं स्यादानंदमयोप्ययं ॥९॥ मयड्वात्र विकारार्थे यथैवान्नमयादिषु ॥ वैरूप्यलक्षणो दोषः प्रा
यार्थत्वे प्रसज्यते ॥१०॥ अपि संक्रमणादस्य कार्यताध्यवसीयते ॥ कार्यात्मिनां हि संक्रांतिर्युज्यते का
रणात्मनि ॥११॥ असौ योवाथ संप्राप्तिः संक्रांतिः स्यात्परात्मनः ॥ नात्मत्वादात्मनः प्राप्तिस्तदुन्नासेति कश्चन ॥१२॥
न चात्मनात्वमात्मानमुपसंक्रामतीश्वरः ॥ नालं स्वस्कंधमारोढुं निपुणोपि हि साधकः ॥१३॥ शि
र आद्यादकृतेकृते मूर्तामूर्ते द्वयसंभवात् ॥ असंभवः परेतत्वेनेतिनेतीतिशास्त्रतः ॥१४॥ अदृश्ये
नात्म्य इत्येवं पूर्वोत्तरविरुद्धता ॥ न स्यादाकारवत्वाद्धि अस्तिनास्तीति संशयः ॥१५॥ कार्यात्मा यमतो

ग्राह्योयथोक्तन्यायगौरवात्॥ भृगोस्तपरमाद्रेतिकार्यत्वेपियुज्यते॥१६॥ आनंदवल्ल्यांब्र
ह्मोक्तंतदुपायविधित्सया॥ अधीहिभगवोब्रह्मेत्यवोचवरुणंभृगुः॥१७॥ व्याख्याततत्वादुपेक्षस्य
रूपायोत्रावशिष्यते॥ उपायाःकोशाःपंचापियस्मात्तैस्तत्प्रपद्यते॥१८॥ अन्वयव्यतिरेकाभ्यां
कोशैरात्मसमीक्षणं॥ क्रियतेहियतस्तेषामुपायत्वंप्रतीयते॥१९॥ स्वातंत्र्यंयत्रकर्तुःस्या
त्तत्रैवासौनियुज्यते॥ फलंकर्त्रनधीनत्वात्संबंधायैवशब्द्यते॥२०॥ पंचकोशानतस्तस्मैवाक्यार्थ
प्रतिपत्तये॥ स्वतःप्रसिद्धेःशेषस्यस्वरूपरेमेभृगुस्ततः॥२१॥ ब्रह्मतानंदरूपस्यकेनवाप्रतिषिध्य
ते॥ निरस्ताशेषभेदस्यरूपंस्वरूपतत्परमात्मनः॥२२॥ प्रियाद्यानंदरूपाणांभेदोयत्रनिवर्तते॥ आम
नोविषयेसंततमानंदंप्रचक्ष्महे॥२३॥ कोशपंचकएतस्मिन्निषिद्धेऽज्ञानहेतुके॥ नानंदमयतान्या
य्याधियांवाचामगोचरे॥२४॥ परानंदस्वभावेनपूर्णात्यन्नमयादयः॥ कार्यात्मानोपितद्धेतोरानं
दमयताभवेत्॥२५॥ तस्माज्ज्ञानक्रियाकार्यप्रियाद्यारक्तबुद्धिगं॥ आनंदमयमात्मानंश्रुतिःसो
पाधिकंजगौ॥२६॥

मनोमयात्मसाक्ष्यत्र श्लोकः पूर्ववदुच्यते॥ यथोक्तवेदसिद्ध्यर्थं लिंगं श्लोकोपिकीर्त्यते॥७६॥
अभिधाननिवृत्तिर्हि ब्रह्मणो नान्यतो यतः॥ सद्भावगमरूपत्वान्मनोप्यस्मान्निवर्त्तते॥७७॥
यद्विवाचानभ्युदितं मनुते मनसा न यत्॥ ब्रह्मणो विषयत्वं हि श्रुतिर्वाङ्मनसोर्वदत्॥७८॥ नागोचरं
ययोरस्ति ब्रह्म मुक्त्वा निरंजनं॥ ते मनोमये निर्दिष्टे विद्याद्वाङ्मनसी बुधः॥७९॥ इतीममर्थं चोद्दि
श्य श्लोकं श्रुतिरुदाहरत्॥ ब्रह्मणोनवसरत्वाच्च नेह मंत्राभिधेयता॥८०॥ वृत्तिप्रधानो वेदा
त्मा वृत्तिमान्स्याद्यथोत्तरः॥ व्यवसायात्मिका बुद्धिर्वृत्तिमात्मदीर्यते॥८१॥ यज्ञं तनुत इत्येतत्क
र्तृत्वे सति युज्यते॥ आत्मचैतन्यरूपा धीः कर्त्र्यात्मा न ध्रुवत्वतः॥८२॥ यज्ञारंभस्य हेतुत्वात्तद्
भावाद्बुधा यजिः॥ श्रद्धा या उत्तमांग त्वं स्मृतिर श्रद्धयेति च॥८३॥ सत्यं हि श्रदिति प्राहुर्धत्ते धीः प्र
सगात्मनि॥ तथर्तस्यां माहात्म्यानः श्रद्धामित्याचिरे धियं॥८४॥ योगो युक्तिः समाधानं आत्मा स्यात्तदुप
श्रयात्॥ श्रद्धादीनि यथोक्तार्थप्रतिपत्तिक्षमापि हि॥८५॥ महत्त्वं महो ग्राह्यं नीडं कार्यस्य तद्यतः॥

२ईदृशोरूपांतरासतात्संततं ब्रह्मत्वाविदुः॥ यस्मादेवमतो हित्वा कोशान् ज्ञानकल्पितान्॥३१॥२

सो सन्नेवेह भवति कोशात्मत्वाभिमानभाक्॥ न हि कोशात्मनासत्त्वमृते ब्रह्म समश्नुते॥३७॥
कुतः सर्पात्मना सत्त्वमृते रज्जुं सदात्मिकां॥ असङ्ख्यः खलु कोशेभ्यः सदेकं ब्रह्म वेद चेत्॥३८॥
निर्विकारमनाद्यंतं परमात्मानमाश्रयेत्॥ यतः कोशातिरेकेणा नासत्त्वं विद्यते परं॥४०॥ मृत्स्क
वा असदित्येवं घटते श्रुत्युदीरणं॥ अस्तीत्येवोपलब्धव्यः सदेवेति च शासनं॥४१॥ ब्रह्मात्म
व्यतिरेकेणासत्त्वमन्यत्र दुर्लभं॥ तस्यैष एव शारीरो यः शारीरः सद्देकलः॥४२॥ आनंदांतस्य पू
र्वस्य ह्यात्मा नात्मवतः परः॥ उक्तं ब्रह्मविदाप्नोति परं नान्योऽस्ति दाश्रयः॥४३॥ इत्यस्य निर्णया
र्थाय परो ग्रंथो वितार्यते॥ साधारणं परं ब्रह्म विदुषो विदुषश्च चेत्॥४४॥ प्राप्यप्राप्तीस
मे स्यातां नियमे हेतुसंभवात्॥ कार्यमात्रावबद्धांतःकरणत्वात्तमस्विनः॥४५॥ न शक्यास्ती
ति धीः कर्तुं स्वतःसिद्धा सवस्तुनि॥ अतोऽस्यास्तित्वसिद्ध्यर्थं कल्पनातीतरूपिणः॥४६॥
अथात इत्यनुप्रश्ना वक्ष्यंते निर्णयार्थिने॥ अथानंतरमस्यैव साधारण्यप्रमेयतः॥४७॥ आ

चार्योक्तिमनुप्रश्नाः शिष्यस्य गुरुसन्निधौ ॥ अप्यविद्वानमुं लोकं प्रेत्य कश्चित्समश्नुते ॥
४८॥ न चेद्विद्वानाप्नोति विद्वानेतीति का प्रमा ॥ स्यान्नवेत्स परः प्रश्नः स्विद्वादि बहुवा
गियं ॥४९॥ श्रुतिश्चात्र विचारार्थो विचार्यं वस्त्विदं यतः ॥ एतेषां खलु चोद्यानामुत्तरोऽर्थोत्त
राश्रुतिः ॥५०॥ द्वयोः सद्भावपूर्वत्वादस्तित्वं तावदुच्यते घटांकुरादियत्कार्यं दृष्टं सत्कारणांहितत् ॥५१॥
आकाशादि च नः कार्यं तदप्येवं प्रतीयतां ॥ असतश्चेदिदं कार्यं सर्वस्यादसदन्वितं ॥५२॥ असतः
कारणत्वं च निरात्मत्वान्न सिध्यति ॥ ध्रुवः संकुरते कार्यमयस्कांतो मणिर्यथा ॥५३॥ कारणत्वंस
वेदेवं कुर्वतोऽतिशयः कुतः ॥ साविद्यः प्रत्यगात्मा यो विद्ययोनिः पुरोदितः ॥५४॥ सोऽकामयत ना
विद्यां विना कामोऽस्ति कस्यचित् ॥ अलातस्यैकरूपस्य वैश्वरूप्यं यथान्यतः ॥५५॥ रूपाभिधा
नभ्रांत्या बहुतेयं परात्मनः ॥ प्रजायेयेत्यतो वक्ति नामरूपा त्मना प्रभुः ॥५६॥ आत्मस्थे
नामरूपे ये देशकालाद्यपेक्षिणी ॥ जगत्कर्मवशादीशात् व्यज्यते बहुधात्मनः ॥५७॥ व्याकृति

र्यां तयोर्विष्णोः प्रयहं नामरूपयोः ॥ भूयोभवनमेतत्स्यात्तमायिनोनेकता यथा ॥ पूर्वान
ह्यनववैयवस्यास्य बहुत्वं युज्यते ञसा ॥ तस्माज्ज्ञात्वैकं बहुत्वं स्यात्व्याम्नाय द्वद्वैटादिभिः ॥५९॥
श्रोतं स्रष्ट्यादिविषयमीश्वरालोचनं तपः ॥६०॥ कार्यत्वाल्लौकिकस्येह तपसो संभवोह्नवेत् ॥६०॥
यथाश्रुतिसमालोच्य ससर्ज जगदीश्वरः ॥ यथाक्रमं यथारूपं यथाकर्म यथाकृतिः ॥६१॥ मा
यावी जगदुत्पाद्य मायये वेश्वरेश्वरः ॥ सर्पादीन्कल्पितास्त्रग्वत्तद्वानुविवेश सः ॥६२॥ मृद्व
च्चैकारणं ब्रह्म कार्यं सर्वं तदात्मकं ॥ तदात्मनातिरेकेणाप्रवेशोन्यो न विद्यते ॥६३॥ न चान्यत्रा
विशद्विष्ठोः श्रूयतेप्येककर्तृता ॥ सृष्ट्वा जगत्तदेवानुप्राविशच्चेति हि श्रुतिः ॥६४॥ कपाला
द्यात्मनांकुंभमृद्वच्चैतत्प्रविशज्जगत् ॥ मृदो नेकात्मकत्वात्तु घटते नेकतो दृशे ॥६५॥ अनात्मदेशवन्म
द्यत्प्रवेशो व्यापिनः कथं ॥ प्रवेशः श्रवणाच्च हि परिच्छिन्नं प्रकल्प्यतां ॥६६॥ मुखे हस्तादिवच्चा
यं प्रवेशोपि घटिष्यति ॥ अमूर्त्तस्यापि नैवं स्यात्कार्यव्यापित्वहेतुतः ॥६७॥ व्यापिवाव्यापिवाकौ

प्रियादिवासनारूपो ह्यानंदमय ईक्ष्यते ॥ विज्ञानमसंस्थो यः स्वप्ने वै स्वप्नदर्शिभिः ॥६७॥ पुत्रादि
भ२ विषयाप्रीतिर्वासना शिर उच्यते ॥ प्रियलाभनिमित्तोत्तो हर्षो मोदः प्रकीर्तितः ॥६८॥ प्रकर्षगुणसं
युक्तः प्रमोदस्यात्स एव तु ॥ सुखसामान्यमात्मास्यादानंदो भेदसंश्रयात् ॥६९॥ उत्दृष्यमाण
आनंदो निष्ठा यत्र निगच्छति ॥ तदेकं सकलं ब्रह्म पुच्छं सर्वाश्रयत्वतः ॥७०॥ आनंदः परएवा
त्माभेदसंसर्गवर्जितः ॥ स एव सुखरूपेण व्यज्यते पुण्यकर्मभिः ॥७१॥ यावद्यावत्तमोपेतिबु
द्धो धर्मसमाहृतः ॥ तावत्तावद्धियः स्वास्थ्यं तावत्तावत्सुखोन्नतिः ॥७२॥ तारतम्यं सुखस्याविवे
चित्त्वादुपपद्यते ॥ पुण्यस्य कर्मणस्तस्मादात्मैवानंद उच्यते ॥ तस्मात्कामादिंनेनस्पृष्टोत्तरोत्तरवृ हा४
द्धितः ॥७३॥ श्रोत्रियस्येति वाक्येन क्काह्यानंदस्य भण्यते ॥ तत्रैतस्मिन्यथोक्तेर्थे श्लोकोप्युच्चैर्नि
गद्यते ॥७४॥ मंत्रद्वारेण वाक्यार्थं कथं नाम प्रपत्स्यते ॥ असत्समासो भवति योसद्ब्रह्मेति वेद
चेत् ॥७५॥ अस्ति ब्रह्मेति चेद्वेद संतं तं ब्राह्मणा विदुः ॥ सदप्यात्मस्वरूपेण ब्रह्माऽसंदेव वेद चेत् ॥७६॥
इति

गमायान्नमयं तं कार्यमाहहि॥ पूर्वपूर्वातिरेकेणात्रीन्कोशानतिलंघ्य च॥७८॥ विज्ञानमयरूपा
यां गुहायां दर्शितः परः॥ तत्रानंदमयो यस्माल्लक्ष्यते राहुचंद्रवत्॥७९॥ मानुषादधि यत्रेदं सु
खं निष्ठां प्रपद्यते॥ उत्कृष्यमाणं क्रमशः तद्ब्रह्मासीति बोधयेत्॥८०॥ विकल्पयोनावेतस्यां नि
र्विकल्पोधिगम्यते॥ तस्मात्तस्यां प्रवेशोस्य कल्प्यतेऽनंतरस्योच्यते॥८१॥ प्रकाशात्मक ए[illegible] तस्मि
न्नुद्बुद्धश्रोत्रादिलक्षणं॥ मोहादीक्षामहेयस्मात्प्रविष्टस्तेन कल्प्यते॥८२॥ तस्यैष एव शा
रीर आत्मेत्येवं ब्रुवाणया॥ ऐकात्म्यमुच्यते श्रुत्या हि प्रविष्टाप्रविष्टयोः॥८३॥ प्रवेशहेतुदो
षाणामध्यस्तानां परात्मनि॥ यदा हीत्यादिना ध्वंस एवं सत्यप्रपद्यते॥८४॥ अप्रविष्टस्व
भावस्य प्रवेशस्तेन कल्प्यते॥ क्षेत्रज्ञश्चेद्धीनेन तस्यैकात्म्यं स्यात्कथंन्विति॥८५॥ मूर्त्तामूर्त्ता
त्मकं कार्यं यत्सृष्ट्वा प्राविशत्प्रभुः॥ रजतं शुक्तिकेवात्मा तदात्मैवाभवन्मृषा॥८६॥ मू
र्त्तभूतत्रयं सत्त्यादितरत्त्यदिहोच्यते॥ अव्याकृतादाशरीरादेतावद्वस्त्तनापरं॥८७॥

समानेतरजातीयान्निर्द्धार्यैदंतयोच्यते॥ तन्निरुक्तंतदत्रस्यादनिरुक्तमितोन्यथा॥८८॥सा
क्षात्सरोक्षरूपेतुमूर्त्तामूर्त्तपुरोदिते॥ निरुक्तेतररूपेयेतयोरेवविशेषयोः॥८९॥ निलयोमूर्त्त
धर्मःस्यादुत्तरोमूर्त्तसंश्रयः॥ विज्ञानंचेतनंविद्यादविज्ञानमचेतनं॥९०॥ व्यावहारिकमेवा
त्रसत्यंस्यादधिकारतः॥ पारमार्थिकसत्यस्यवाक्यांतसमुदीरणात्॥९१॥ मृगतृष्णादियन्मि
थ्यातदिहानृतमुच्यते॥ इत्येतदभवस्त्वत्रात्यविद्योत्थमविद्यया॥९२॥ प्रत्याख्यानेनसर्व
स्यसस्यदाद्यात्मकस्यहि॥ व्यावृत्ताखिलनानात्वमहंब्रह्मेतिबोध्यते॥९३॥ नेतदस्ति
ननास्तीदंद्वयोर्मोहोद्भवत्वतः॥ नसतंनासदित्येवंप्राहविश्वेश्वरोपिहि॥९४॥ आविर्भा
वतिरोभावौबुद्धेर्यत्साक्षिकाविह॥ तमेकमंतरात्मानंविद्यादव्यभिचारिणं॥९५॥ तस्मादस्ति
परंब्रह्मयस्याविद्याविकल्पिताः॥ संतीवसत्तामालंब्यकार्यकारणलक्षणाः॥९६॥ विवाद
गोचरापन्नंयत्किंचिद्विचनात्मकं॥ तत्सर्वंबुद्धिमत्पूर्वंतदात्मत्वाद्घटादिवत्॥९७॥ तत्रैतस्मि

न्यथोक्तेर्थे श्लोकः पूर्ववदुच्यते॥ अस्यक्तार्थानुवादी तु दृढिम्ने पुंधियोधुना॥९८॥ यदि
दं शब्दधीगम्यं प्रागसत्तदभूज्जगत्॥ असद्ध्वैतं नवात्रस्याद्ब्रह्मैवानामरूपकं॥९९॥ नामरू
पात्मकं कार्यमनात्मत्वात्स्वतो ह्यसत्॥ यत्सदेकं परंब्रह्म ततो वै सदजायत॥१००॥ स संज्ञा
नमनंतं यत्तदुपेतमविद्यया॥ स्वात्मनैव स्वमात्मानं सत्सद्रूपमचीक्लृपत्॥१॥ यस्मात्स्वर्क
यमिदं सर्वमकारो त्रिपुपाः प्रभुः॥ सुकृतं प्रभुमेवातो माहात्म्यान्नः प्रचक्षते॥२॥ यद्वीश्वर
निर्वृत्तं कार्यं कार्यं सुकृतमुच्यते॥ निस्त्रंसं श्रवपात्साक्षान्न तु कर्त्तेश उच्यते॥३॥ लोकेपि=
स्वामिना साक्षाद्यत्कृतं कर्म यत्नतः॥ तदेव सुकृतं प्राहुर्न तु भृत्यैस्तथा कृतं॥४॥ यद्वैतत्सु
कृतं प्रोक्तं सत्पदादिस्वभाकं॥ नीरसस्यास्य कार्यस्य रसो सोपरमः स्मृतः॥५॥ रसः सारोऽमृ
तं ब्रह्म आनंदो ल्हाद उच्यते॥ निःसारं तेन सारेण सारवल्लक्ष्यते जगत्॥६॥ रसस्यातीं द्रियस्या
स्यत्वानंदत्वं कुतोन्विति॥ अतस्तत्सतिपत्स्यर्थं रसं ह्रीस्यक्त्तरं वचः॥७॥ एतस्मादपि हेतोस्त

कार्यंव्याप्तोसेवह्निकारणं॥ नस्यात्तच्छून्योदेशोस्तियंजीवेनाविशेत्परः॥६८॥ अथकारणरू
पेणकार्यंमीशःसमाविशेत्॥ अहंब्रह्मेतिवज्ज्ञस्यात्कार्यंकार्यात्मतांतथा॥६९॥ मतंजीवात्मकं
कार्यंयातिक[illegible]यातिकार्यांतरंयदि॥ विरोधान्नैवमप्येतन्नेतिकुंभःशरावतां॥७०॥ नामरूपा
दिकार्याश्चव्यतिरेकानुवादिनी॥ श्रुतिःकुप्येतमोक्षश्चतदापत्तौसुदुर्लभः॥७१॥ जलार्कव
त्प्रवेशश्चेच्छायापरिछिन्नरूपतः॥ अमूर्त्तत्वाच्चनास्येवंप्रवेशउपपद्यते॥७२॥ एवंतर्हिप्र प
वेशोस्यक्लिष्यतेनकथंचन॥ नचगसंतरंविद्योयेनवाक्यंसमर्थ्यते॥७३॥ आनर्थक्यादि
दंतर्हिसंउच्यतांशिशुवाक्यवत्॥ प्रवेशवाक्यंनेवंतद्वंतरसमाश्रयात्॥७४॥ ब्रह्मविप्परमा
प्नोतीत्युक्त्वाससादिलक्षणं॥ प्रावेशयद्गुहांतच्चतदेनात्म्यत्वशांतये॥७५॥ अब्रह्मत्वनि
वृत्त्यर्थंब्रह्मात्मेतिविशेषणं॥ तन्निवृत्ताववाक्यार्थंकैवल्यंप्रतिपद्यते॥७६॥ यस्मादेवं
फलंतस्माज्ज्ञानमत्रविवक्षितं॥ गुहायामद्वयंब्रह्मतस्मान्निहितमुच्यते॥७७॥ तद्रूपानु

स्ति हेहेतवः सम्यग्ब्रह्मरूपोभिहितायतः ॥१८॥ उताविद्वानिति प्रश्नः अस्याविष्क्रियते धुना ॥ वि
द्वानेवैतितद्ब्रह्मस्यस्वयंभयहेतुयत ॥१९॥ तमोमात्रावबद्धत्वात्तस्यासेर्नान्यदस्तिहि ॥ व्यवधानं
नै२ हियद्य[illegible]स्यात्तन्मोहैकहेतुकं ॥२०॥ यस्मात्तस्मादविद्यैवमोक्षाप्तेर्व्यवधिर्नवेत ॥ अविद्या
सोऽप्यपि प्रत्यक्सदानस्तमितोदितः ॥२१॥ अविद्ययाव्यवहितस्तद्बलेनैवतद्वचः ॥ विद्व
त्ताव्यतिरेकेणयदितस्यासिरुच्यते ॥२२॥ चोद्यमेतत्तदायुक्तं नह्येवं सति युक्तिमत ॥ यातुसा
धारणप्राप्तिरात्मत्वाद्ब्रह्मणः स्वतः ॥२३॥ विदुषोविदुषोवासावस्माभिर्ननियम्यते ॥ अतोवि
द्यानिषेधेन सर्वदावाप्तिरूपिणः ॥२४॥ प्राप्तिः स्यादात्महेतुत्वादिति पूर्वमवादिषं ॥ अतः परी
क्ष्यते ऽस्यातदिदानीं प्रयत्नतः ॥२५॥ विद्वानेवैतिनाविद्वान्यदाहीयवमाद्यया ॥ विषयानुप
त्तिनीयातुस्वशेषकारणाश्रया ॥२६॥ लौकिकत्वात्सदार्थस्य दृष्टीरत्राभिधीयते ॥ विशेषव
द्भवेदृश्यं तद्धि दर्शनमर्हति ॥२७॥ नित्यादृष्टिरभावोवानैवदर्शनमर्हति ॥ दृश्यान्वयिहि

यद्वस्तु तदात्म्यमिति भण्यते ॥१८॥ स्वतोऽस्य स्यात्स दारिद्र्याद्दृढार्थं लभते च यत् ॥ स्याद्वा
वै जाग्रदवस्थेयं दृश्यत्वेन प्रसिद्धितः ॥१९॥ कोशत्रयमिहात्म्यं स्यादात्मार्थत्वसम
न्वयात् ॥ पंचमो च निरुक्तः स्यात्पारिशेष्यात्फलात्मकः ॥२०॥ अत्मानन्दमयं ब्रह्मत्व शा२
निरुक्तं परंपदं ॥ विलीयते जगद्यस्मिन्निलीनं जायते यतः ॥२१॥ निलयं तं वयं ब्रूमः
कोशपंचककारणं ॥ सच्चासच्चादिवापेक्ष्य निषेधोऽयमिहोच्यते ॥२२॥ प्रातिलभ भवदिभ्युक्तौना
रूपासन्निषेधनं ॥ मूर्तामूर्तौ हि राशी द्वौ सच्चासच्चादिनोदितौ ॥२३॥ क्रसंत्तरे पासंगनात्तयोरेवा
स्वप्रकृतिः ॥ अस्मिन्यक्षे तु निलयो वासना निलयो भवेत् ॥२४॥ एवं च नेति नेतीति साक्षात्स्या
द्ब्रह्मदर्शनं ॥ भावाभावात्मिका बुद्धिर्यत आत्मापचारिणी ॥२५॥ भावाभावनिषेधेन प्रती विस्फु
प्यते ततः ॥ दृश्यादिप्रतिषेधोक्त्या प्रतीचि ब्रह्म बोध्यते ॥२६॥ न तदन्यत्तदन्यस्य परमार्थास
ताकुतः ॥ न नञर्थो विकल्पो वा परमार्थमकल्पितं ॥२७॥ असंप्रविश्य संसिद्धिं लभते

द्य्चिदन्यतः॥ दृश्यादिगुणहीनस्य स्वत आत्मत्वकारणात्॥३८॥ वेत्ति विंदत इत्यस्मा
देकार्थाद्रूपसंहृतिः॥ दृश्यादिगुणहीनेस्मिन्निरवद्याय दामयं॥३९॥ साक्षाद्वेत्ति तद्वेदा
यमभयं विदते परं॥ ब्रह्मपुच्छं प्रतिष्ठेति यदभाणि पुराणकृत्॥४०॥ तेनैकवाक्यतार्थाय स२
ति प्रतिष्ठामिंभण्यते॥ अथाधुना यथा विद्वान्प्रेत्यनेतिपरंदं॥४१॥ व्याख्यायते यथास्पष्टं प
यदाहीयेवमद्यया॥ सदात्मब्धात्मकस्यापि यतो ज्ञानमवाप्तिकृत्॥४२॥ अत्रवाद्यन्तरेतत्र ना५
स्याविद्यानेतीतिसादरं॥ यस्मादेवमतो विद्वांल्लभते न तमिश्वरं॥४३॥ अविद्याम्नवधा
नाद्धि लब्धएवन लभ्यते॥ यदाह्येवेष आत्मेको दृश्यत्वादिविवर्जितः॥४४॥ एतस्मिन्व
र्त्तमानोपि वंचितो विद्ययेव हि॥ मोहादादेवमनात्मिस्यादात्मनोपिममात्मनः॥ अविद्यया
तदोद्भवस्य रज्वा रज्जुमिव स्वयं॥४५॥ अहिलेनाद्वयाद्वोधात्कुरुते कर्तृभोक्तृभिः॥ अरे
छिद्वंभिदान्यत्ववेद्यवेत्तृत्वलक्षणं॥४७॥ यस्मादुत्कुरुते मोहादात्मनो ब्रह्मणः स्वतः॥ अ

हत्वप्रासमपिद्वयमप्राप्तमिवमन्यते॥२

दस्तीत्यभ्युपगम्यतां॥ इतश्चास्ति परं ब्रह्म रसत्वस्य प्रसिद्धितः॥८॥ तृप्तिहेतू रसो नाम
मधुराम्लादिलक्षणः॥ अन्नादिरसलाभेन यथा तृप्ताः समासते॥९॥ आनंदिनः कामहीनाः
निरीहाः साध्यसिद्धये॥ अपविद्धैषणास्तद्वद्ब्राह्योपादानवर्जिताः॥१०॥ निःसंबोधं परानंदं प्रा
प्ताः संन्यासिनोमलाः॥ नूनं तेषां परं स्वास्थ्यं चेतास्याल्हादयत्सलं॥११॥ प्रल्हादश्चेतसां यानि
तानि लिंगानि तेषु हि॥ उपाग्निषा मनस्येव सुखसंसक्तचेतसः॥१२॥ लिंगं कंडूयमानस्य लक्ष
याभ्यासवेदिषु॥ अज्ञातानंदतत्वानामनुमानमिदं भवेत्॥१३॥ साक्षात्कृतात्मतत्वानां प्रत्यक्ष
तमवेक्षतः॥ बाह्येंद्रियाणामध्यात्म्यं संहतिर्यैर्हि लक्ष्यते॥१४॥ एकार्थवृत्तिरूपेपासा दृष्टा संहते
सति॥ अतः सा पक्षे माहेयं कोह्येवान्यादिति श्रुतिः॥१५॥ आकाशे परमे व्योम्नि ह्यानंदो न भवे
यदि॥ आब्रह्मस्तंबलोकेस्मिन् पुण्यकर्मानुरूपतः॥१६॥ आनंदः परमो यस्मादानंदयति नः स
दा॥ सोयं लौकिक आनंदो निष्ठां साधनसंपदा॥१७॥ यत्र प्रपद्येत भूम्नि सो स्यानंदः परो रसः॥ अ

न्योसावीश्वरो मतस्तस्माच्चाहमनीश्वरः॥४८॥ इति। छिद्यतोच्छिद्यं छिद्रेनर्थो भवे
द्वयं॥ निर्भयोपि स्वतो विद्वानेकं संतमनेकधा॥४९॥ प्रकल्प्याविद्यमात्मानं तमेव भवमा
प्नुयात्॥ भयहेतोर्द्वितीयस्य हिशब्देन परिग्रहात्॥५०॥ द्वितीयाद्वै भयं हीति श्रुतिस्त
स्रैरतोन्वशात्॥ इत्नीतव्याद्विस्त्वोमघस्मादीशो भयंकरः॥५१॥ इति कल्पयतस्तस्मा
वि दभयं जायते भयं॥ अहो बलमैद्या याऽतिशेते न कश्चन॥५२॥ अम्याद्भियहेतो
र्यब्रह्मणोपि भयंकरी॥ निर्भयो भयरूद्देव ईश्वराणामपीश्वरः॥५३॥ भयं तस्या
पि जनयेन्नाज्ञानस्यास्य गोचरः॥ यत्ज्ञात्वा विंदते विद्वान् भयं हीत्यवादिषं॥५४॥ त
देवाभयरूद्ब्रह्मस्यान्मोहादात्मनो भयं॥ निबिद्धद्रश्यतावेकमभयं मोहनिन्हवात्॥
॥५५॥ यत्तस्यैव भयं तत्स्यादविद्यावशवर्त्तिनः॥ अपिवालाग्रमात्रेणाविदुषः प्रत्य
गात्मनः॥५६॥ भिन्नं ब्रह्मेति संमोहादासैवास्य भयं भवेत्॥ व्याख्यानं वा पुरोक्तस्य

छिद्रस्य क्रियते नया ॥५७॥ अमन्वानस्य तद्ब्रह्म विदुषोपि भयंकरं ॥ वेद्यवेतृत्वशून्य
त्वाद्विद्वत्तापि तमोमयी ॥५८॥ रजतत्वादिवद्दृक्ता वमन्वानो भवेदतः ॥ यस्यामतं तस्य
मतं मतं यस्य न वेद सः ॥५९॥ विदिताविदिताभ्यां तदन्यदेवेति हि श्रुतिः ॥ अन्यदेव हि
तद्विद्यादवेद्याद्न्यदेव तत् ॥६०॥ वेद्यवेतृद्वयाद्व्यान्यदिति श्रुत्यनुशासनं ॥ वेद्यावेद्यास
ता यस्माच्छुद्धा यथार्थानुपातिनी ॥६१॥ वेद्यवेतृत्वमप्येवमन्यथा तदसंगतेः ॥ सुखाप्य
वेद्यात् विद्याया वेत्तुश्चाज्ञानकल्पितात् ॥६२॥ तदन्येभ्यश्च जानीयादहं ब्रह्मेति वाक्यतः ॥
यथोक्तबोधविरहादीश्वराणामपीश्वराः ॥६३॥ प्रतीतो ब्रह्मणो भीताः स्वकर्माणि प्रकु
र्वते ॥ वातादयो महावीर्याः स्वतंत्रा बाहुशालिनः ॥६४॥ तेपि भीताः प्रवर्त्तंते ब्रह्मणोपि मह
त्तमाः ॥ यस्माद्ब्रह्मण आनंदाज्जीता वातादयो वशाः ॥६५॥ स्वकर्मसु प्रवर्त्तंते भृत्याः स्वामि
भयादिव ॥ तस्यानंदस्य मीमांसा विचारः क्रियतेधुना ॥६६॥ उत्कर्षेतरहीनो सोयआ

नंदोधिगम्यते॥ दृष्टः सातिशयस्तावदानंदः कर्महेतुकः॥६७॥ आब्रह्मनरपर्यंतेलो
केस्याभिः प्रमाणतः॥ उत्तरूप्यमाणो यत्रायं परानिष्ठां प्रपद्यते॥६८॥ अनापन्नादिम
ध्यांतं तद्ब्रह्मैस्य वधारयेत्॥ ब्रह्मादिनरपर्यंतं पुण्यकर्मानुरूपतः॥६९॥ उपजीवति
लोकोयं यस्यानंदस्य विप्रुषं॥ उत्तरोत्तरवृद्ध्यैवं मनुष्यादधितेवयां॥७०॥ प्रतिपद्या
महेसाक्षादानंदं स्वात्मनिस्थितं॥ विषयेंद्रियसंबंधसमुच्छेवाभवेदयं॥७१॥ लौकि
कोनंदवत्स्याद्वा सर्वसाधननिस्पृहः॥ तत्र लौकिकआनंदो बाह्याध्यात्मिकसाधनः॥
॥७२॥ संपन्निमित्तो यो दृष्टः सैषातिसइहोच्यते॥ उत्कृष्यमाणो नानेन त्वयस्य ज्यो
त्वरवर्तिना॥७३॥ असाधनमसाध्यं तमानंदं व्याचक्ष्महे॥ निष्ठां सातिशयं यस्मा
त्स्वतोनतिशयात्मनि॥७४॥ गच्छदीक्षामहे यस्मादेवमानंद इष्यतां॥ येयं सातिश
यासंख्यासंख्येपार्थावसायिनी॥७५॥ यथैवमस्य दानंदः स्यात्सरानंदनिष्ठितः॥ आवि

कूरिष्यं साहात इममर्थं श्रुतिः स्वयं ॥७६॥ बहिः श्रवणादृष्टीनां स्वतोसामर्थ्यद
र्शनात्॥ युवा प्रथमवयास्या यूनः साधुयुवेति किं ॥७७॥ पंचविंशाद्विकः साधुरितिस
धुयुवोच्यते॥ मिथः सख्यभिचारित्वात्साधुयौवनयोरतः ॥७८॥ विशेषणमिदं तस्मा
त्पुनः साधुयुवेति हि॥ अध्येति सर्वमध्येयमतोध्यायक उच्यते॥७९॥ क्षिप्रकार्यति
शायित्वादाशिष्ठोसौ भवेदतः॥ समग्राशेषवार्वेगो दृढिष्टः परिकीर्त्यते॥८०॥ अभि
भूयय तः सर्वान्बलिनो वर्त्तते ततः॥ बलिष्टस्तेन तद्विद्भिः कीर्त्यते पृथुकीर्त्तिभिः॥८१॥
यावदाध्यात्मिकं किंचित्पुंभिरापेक्ष्यते क्वचित्॥ दृष्टादृष्टेष्टभोगाय तेन सर्वेण संयुतः॥
॥८२॥ तस्येयं पृथिवी सर्वा पूर्णा वित्तस्य चेद्भवेत्॥ इति साधनमुक्तं स्यात् दृष्टादृष्टार्थ
कर्मणः॥८३॥ बाह्यैराध्यात्मिकैश्चैवं संपन्नैः साधनैः पुमान्॥ लभते यमसौह्लादं नरानंदः स
उच्यते॥८४॥ ये एते शतमानंदा मानुषाणां समाहृताः॥ नरगंधर्वकाणां स्यात्तावानेकः प्रमापतः॥८५॥

सुगंधिनः कामरूपा अंतर्द्धानादिशक्तयः ॥ नृत्यगीतादिकुशला गंधर्वास्युः नृलौकिकाः ॥
॥८६॥ नृयो द्वंद्वप्रतीघातशक्तिसाधनसंपदा ॥ नारगंधर्विको नृयानानंदो मानुषादधिः ॥८७॥
आविरिंचाद्भवेदेवं पूर्वस्मादुत्तरोधिकः ॥ सहस्रदशभागेनत्युक्ततरोत्तरतः क्रमात् ॥८८॥
श्रोत्रियोधीतवेदः स्यात्साध्वाचारः प्रसिद्धितः ॥ कामानुपहतात्मापि स्यादकामहतस्तथा ॥८९॥
मास्यां ज्ञोगाद्विरक्तस्य त्यक्तराह्लादकामिनः ॥ सहस्रदशभागेन मानुषादुपातो भवेत् ॥९०॥ इत्ये
तस्य प्रसिद्ध्यर्थमादावग्रहणं कृतं ॥ अकामहत इत्यस्य हेतोरानंदवृद्धये ॥९१॥ श्रोत्रियावृजिनत्वे
द्वे सर्वत्रैव समे अपि ॥ कामानुपहतत्वस्य वृद्ध्योह्लादो विवर्द्धते ॥९२॥ यतो कामहतत्वं स्यात्सर्वा
तिशायिनौजसा ॥ सुखस्य प्राप्तये तस्मात्तदेवोत्कर्षकृद्भवेत् ॥९३॥ तस्याद्यथोदितानंदप्राप्त
ये साधनत्रयं ॥ श्रोत्रियावृजिनत्वे द्वे तथाकामहतात्मता ॥९४॥ तुल्ये आब्रह्मणः पूर्वे उत्कर्ष
स्तूत्तरस्य च ॥ अकामहतनैवातः पूर्वाभ्यां साधनं परं ॥९५॥ चिरकालस्थितिर्येषु पितृलो

केषु ते स्मृताः॥ चिरलोकलोकास्ते पितरः श्राद्धादिकारिणः॥६६॥ आजानो देवलोक
स्यात्तत्र जाता आजानजाः स्मृताः॥ स्मार्तकर्मकृतस्तत्र जायंते देवजन्मिषु॥६७॥ कर्मवैर्त विद्वांसो व२
ये जाताः सुरसद्मसु॥ कर्मदेवास्तु तान् विद्याद् देवोश्चोत्तरमार्गगान्॥६८॥ त्रैलोक्यदेहश्चा
त्र स्याद्विराडेव प्रजापतिः॥ समष्टिव्यष्टिरूपश्च ब्रह्मेह परिगृह्यते॥६९॥ तएते सर्वआनं
दाः यत्रैकत्वं व्रजंतिनः॥ कामश्च तन्निमित्तो ज्ञानं यस्य द्वयात्मकं॥७०॥ तथा कामहतत्वं
च निष्ठां यत्र प्रपद्यते॥ तमानंदं विजानीयाद्ब[illegible]र्मनानेन वाक्यतः॥१॥ आनंदानंदिनो
श्चात्र न भेदस्यान्मनागपि॥ असेवापोदितो यस्माद्विंदं कुर्वन्मनागपि॥२॥ न साधनम
यं किंचित्स्यात्मसिद्धावपेक्षते॥ स्वतः सिद्धेरविद्यायाहानमात्रमपेक्षते॥३॥ गुरुभारा
वसन्नस्य भारापनयतो यथा॥ उत्कृष्यते क्रमात्स्वास्थ्यं स्वात्मन्येवं तमःक्षयात्॥४॥
अथेदानीं परीक्षायामद्वैतानंदलक्षणं॥ उपसंह्रियते साक्षात्फलं साधननिस्पृहं॥५॥ निर्द्वैताशेष

संसारः सत्यमित्यादिनोदितः व्युत्थाप्या सत्या ज्ञानादेर्बुद्धौ चात्मनि दर्शितः ॥६॥ निष्ठ
ष्या विद्योत्संगस्यात्तत्साक्षिणमात्मनः ॥ साक्षात्तेनैव तद्विद्यः प्रत्यक्ष्यात्सोयमित्यतः ॥७॥
अकामहत इत्येवं निरविद्योभिधीयते ॥ तस्यामसत्यां तद्ब्रह्मस्वयमेवानुभूयते ॥८॥ अज्ञा
तं ज्ञायते यत्र प्रमातृत्वाद्यनिह्नवात् ॥ तत्र मानांतरापेक्षा न स्वतो व्यगमात्मके ॥९॥ प्रमेवा
सालिका यत्र तन्नन्यानुभवालिका ॥ नात्र मानांतरापेक्षा सेवा नस्त्वमितोदिता ॥१०॥ आधेया
र्थप्रधाने यं सप्तमी पुरुषात्परा ॥ योयमित्यादिनात द्व्युत्तिरेवं प्रवादिनी ॥११॥ अकामहतधी
गम्यो योयं बुद्धेः स देक्षकः ॥ अयं पुरुष इत्यच स एवमभिधीयते ॥१२॥ प्रध स्तास्मद्विभाग
श्रेरो विष्णुर्यश्च भास्करे ॥ सूर्य आत्मेति मंत्रोपि योसावितिच साक्ष्यथ ॥१३॥ क्षेत्रज्ञेश्वरभे
देन स्वभिन्नं व स्त्व विद्यया ॥ तस्मात्तज्ज्ञानतश्चैक्यं घटेतररवयोरिव ॥१४॥ मूर्त्तामूर्त्तास
कस्यास्यत्युत्कर्षः परमोरविः ॥ सांतर्गतेन तस्यैक्यं तन्निमित्तनिषेधतः ॥१५॥ अनन्यस

यद्दृष्टेवमपकृष्टं नृबुद्धिगं ॥ उत्कृष्टेनेश्वरेणाथ वित्तीनस्य हिरण्यवत् ॥१६॥ उ
त्कृष्टस्य यदपेक्ष्ये शास्त्रत्ताव ह्यध्यतेबलात् ॥ जहाति पश्चादुत्कर्षमपकृष्टस्य श्रेयो
हि सः ॥१७॥ नादिसच्छस्त दोत्कर्षो नापकृष्टस्तथा मनि ॥ हि लोभयमवाक्यार्थे नेतिने
तीति विद्यते ॥१८॥ उत्कृष्टिर्वापकृष्टिर्वा नेह स्वात्मनि विद्यते ॥ तमोपहत दृष्टीनामुत्क
कृष्टीतरवीक्षणं ॥१९॥ अविद्यैव यतो हेतुरुत्कृष्यादेर्नवस्तुतः ॥ जमधायां विद्यया
तस्यां नानात्वं विनिवर्त्तते ॥२०॥ अतिशेते यतः सर्वानानंदानाग्रजा दृष्टि ॥ विकल्पमूमे
६ र्व्यांत्ते रैक्यं स्वात्मरविरुद्ध योः ॥२१॥ स संज्ञानमितिख्यस्मादसत्याद्यर्थवारणात् ॥ भेदाश्रय
स्य व्यावृत्ते रैक्यं स्वात्मरविरुद्धयोः ॥२२॥ कार्येण रसलाभेन प्रापनात्कृपपत्तिभिः ॥ अस्ती
त्युपाक्रियेतस्य प्रादुर्भावहेतः स्वयं ॥२३॥ प्रश्नयोरस्ति नास्तीति व्याख्यातत्वादथाधु
ना ॥ अहो विद्वानमुं लोकमितस्स्यापाक्रियोच्यते ॥२४॥ ~~प्रश्नयोरस्तिनास्तीति~~ तद्वाणीभा

मुक्तो न कर्मणः कार्यं यस्मादण्वपि विद्यते॥ शुद्धं यस्मात्स्वतस्तस्मादतः शुद्धं स्वतो भवेत्॥४३॥ ॥९॥

भिन्नो यदि वोभयलक्षणः॥३४॥ भेदश्रुतिविरोधः स्यादन्योसाविति निंदनात्॥ कर्मक
र्तृत्वमेकस्य दोषोऽभेदेपि विद्यते॥३५॥ परस्य दुःखिता चैवं पराभावः प्रसज्यते॥ तस्मा
न्निर्द्धारणार्थोयं विचारः क्रियतेऽधुना॥३६॥ निश्चितं हि परिज्ञानं फलवत्स्यात्ससिद्धितः॥
वा नान्यस्यान्यात्मता यस्मात् ध्वंसे ध्वंस एव वा॥३७॥ तस्मादनन्यो विज्ञेयः परस्मादात्मनो
बुधः॥ अन्यश्चेद्ब्रह्मवेद्विद्वान्भूत्वा ब्रह्म भवतीति किं॥३८॥ बाढं प्राप्नोति ब्रह्म नानात्मा प्राप्नोति ये परं
न तत्॥ दशमाप्तिवदज्ञानात्स्वरूपादिव वर्ण्यते॥३९॥ विद्यया तदवाप्नोति यदनाप्तम
विद्यया॥ तमोन्धव्यतिरेकेण नेह ग्रामादिवाप्तिवत्॥४०॥ तत्प्राप्तिसाधनं ज्ञानं ग्राममा
र्गप्रबोधवत्॥ इत्येवं चेन्न वैश्चर्यान्न हि तच्चोपदिश्यते॥४१॥ गंतव्यविषयं ज्ञानं यथास
सादिलक्षणं॥ कर्मापेक्षं परप्राप्तौ ज्ञानं स्यादिति चेन्न तत्॥४२॥ अतो मुक्तः स्वतो ब्रह्मवद्ध
स्यात्कर्म च किं स्वदृष्टप्राप्तौ ज्ञाश्चैकत्वादभिन्नः स्यात्पराद्बुधः॥४४॥ विपक्षे व्यतिरेकेणायदीशा
एण

न्यो न विद्यते ॥ ततः स्यात्कथमभयप्राप्तिर्द्वितीयाद्वै भयश्रुतेः ॥४५॥ द्वितीयं चेद्द्विविधं ख्यमेकं
वस्तु स्वतो यदि ॥ न सर्वदैकधीरेति विभागोक्तिः सदा भवेत् ॥४६॥ यदि तैमिरिकादन्यैर्द्विती
यान्नेक्ष्यते शशी ॥ चंद्र एक इति नि[illegible]नं तदा स्यात्पारमार्थिकं ॥४७॥ तेद्गृह्यते द्वितीयं चेन्न सुषुप्तेऽग्रह
श्रुतेः ॥ न चेहान्यमनस्त्वात्स्यात्सर्वेषामग्रहो यतः ॥४८॥ अस्त्येव तद्द्वितीयं चेद्ग्रहणात्स्वप्नबोधयोः ॥
अविद्याख्येन तेनैवं तदा तद्भावभावतः ॥४९॥ द्वयाबोधः सुषुप्तेऽपि त्वज्ञानादिति चेन्न तत् ॥ स्वाभाविक
त्वात्तस्यापि निमित्तस्यानपेक्षणात् ॥५०॥ अन्यापेक्षं हि यद्रूपं न तत्तस्य स्वतो भवेत् ॥ विक्रिया विक्रि
यावत्स्य तत्तमन्यानपेक्षणात् ॥५१॥ स्वप्नवन्न सुषुप्तोतः स्वत एवाद्वयत्वतः ॥ द्वैत ईक्षेन्न लोपः स्यात्स
त्यमेवं श्रुतेर्वचः ॥५२॥ अस्मिन्नोऽन्यो भवेद्येषामीश्वरः कारणात्तथा ॥ कार्यं भयानिवृत्तिः स्यादन्य
हेतुत्वसंश्रयात् ॥५३॥ अन्यस्य भयहेतुत्वमधर्मापेक्षयेति चेत् ॥ मैवं तस्यापि तुल्यत्वान्निवृत्ते
स्यादसंभवः ॥५४॥ निर्निमित्तं भयं चेत्स्यान्न तस्यास्ति निवारणं ॥ ध्वंसे न नानिवृत्तिः स्याद्दास

नो नेष्यते तथा ॥५५॥ एकत्वपक्षे हेतेषां दोषो नान्यतमो भवेत् ॥ भयस्याज्ञानहेतुत्वात्तन्निवृत्तौ ७८
निवर्त्तते ॥५६॥ अन्यहेतुः स्वतोऽस्माद्द्वयं न्नो भयथापि हि ॥ स्वातंत्र्याभावादन्यस्मिन् स्वात्म
हानं च नेष्यते ॥५७॥ अनिवर्त्यस्वमात्मानं न भयस्य निराक्रिया ॥ निवृत्तावपि नैव स्यान्निवृत्ते
वसमाहितः ॥५८॥ अविद्यामात्रहेतोस्तु सर्वमेतत्समंजसं ॥ तस्यामसत्यां तन्न स्यात्सत्यामे
व हि भीर्यतः ॥५९॥ यद्ज्ञानाद्भयं यस्यात्तज्ज्ञानात्तत्कुतो भवेत् ॥ रज्जुसर्पादिवत्तस्मादवि
द्यैव भयोद्भवः ॥६०॥ विद्याविद्यात्मकं ब्रह्म मतं चेन्न विरोधतः ॥ पृथक् दृश्यमानत्वादात्म
नो घटरूपवत् ॥६१॥ प्रत्यक्षेणापि हि दृश्येते विद्याविद्ये मनोगते ॥ न तयोरात्मधर्मत्वं तस्मात्तेना
त्मरूपयोः ॥६२॥ अंतरा नात्मरूपे द्वे ब्रह्म बाध्येत योर्हि तत् ॥ न स्तो ब्रह्मणि ते भानाबुध्यास्तमया
वि वा ॥६३॥ कर्मकर्तृकृतैकस्य दोषस्यादिति चेन्न तत् ॥ संक्रांते ज्ञानमात्रत्वात्तद्विभेदनिरासिनः
॥६४॥ सुखदुःखादिसंबंधमात्मात्मानं न वेत्ति चेत् ॥ भवतो मुमुक्षुता कस्माद् द्विसंभादेतद्

ते

उसंप्लुष्ट बहुलाज्ञान ध्वीरहं ॥ यदाऽहं हीसादिनामन्ये उसादे विनिर्णयं ॥२५॥ उताविद्वा
नमुं लोकमिति प्रश्नविनिर्णयात् ॥ अस्ति नास्तीति सिद्धः स्यात् प्रश्नयोरिति निर्णयः ॥२६॥ विद्वत्ता
व्यतिरेकेण फलं भिन्नं यथा तथा ॥ अकामहततायास्तु परानंदो न भिद्यते ॥२७॥ अनेक
जन्मसंसिद्धः स यः कश्चिद्‌ इव देहि ॥ यथोदितार्थविल्साक्षादस्माद्भागे तरात्मकान् ॥२८॥
लोकादाध्यात्मिकास्तेस्य यश्च स्यादधिभौतिकात् ॥ तदुक्तं ते भवेद्धेतु रत्नसृष्टिस्थितिक्ष
का यः ॥२९॥ लोकं दस्मात् समुत्क्रम्यस्येवं विद्विति वाचकः ॥ सर्वशेषामिति ज्ञाय्यं तद्व्याख्यानाय
चोत्तरं ॥३०॥ गते हान्नमयात्मानं तत्कार्यं यद्वदस्मगात् ॥ अन्ने नान्नमयं तद्वद्विद्वान् प्रा
णमयात्मना ॥३१॥ तस्यापि स्वं तनात्मानं महीरश्चु मिश्च ततः ॥ मनोमयात्मना बाह्यमुं सं प.
क्रामतीश्वरः ॥३२॥ पूर्वपूर्वप्रहाणं स्यादुत्तरोत्तरगामिभिः ॥ दृश्याद् दृश्यादिहीनेथ
प्रतिष्ठां विंदते भयं ॥३३॥ योसावेवं विदिमुक्तः परस्मात्किमसौ भवेत् ॥ स्वतो भिन्नोथवा

तस्मात्तस्य मननं तं यत्सर्वदा विकल्पेक्षणं ॥ तदस्मीति प्रबोधार्थं वक्ष्यामिति कल्प्यते ॥७६॥ ३९
पंचकोशातिवर्त्यात्मा ज्ञानभानंदयाक्रमात् ॥ जगध्यापं चापि कोशांस्त्यां निर्वाणात्मनि दीपवत् ॥
॥७७॥ तदेतस्मिन्यथोक्तेर्थे श्लोको मंत्रोपि विद्यते ॥ अशेषानंदवल्ल्यर्थसारस्यास्य प्रकाश
कः ॥७८॥ यतो वाचो निवर्त्तंते तद्ब्रह्मेति प्रतीयतां ॥ शब्दप्रवृत्तिहेतूनां प्रत्यगात्मन्यसंभवात् ॥७९॥
शब्दार्थासंभवं प्राह स्वप्राप्यस्यादरात् श्रुतिः ॥ तस्माल्लक्षणावाचीनि सत्यादीनि पुरा ब्रुवं ॥८०॥
विशेषणविशेष्याणां निषेधाकोशशायिनां ॥ निर्ममं निरहंकारं ब्रह्मैवात्मस्वरूपास्य हे ॥८१॥
इत्यादिविषयेयानि प्रयुक्तानि प्रयोक्तृभिः ॥ स्वार्थहेतो निवृत्त्यैव निवर्त्तंते वचांस्यतः ॥८२॥ न व
मातृयाचिनो यस्मात्तस्य या बुद्धिकर्तृकाः तं निवृत्तौ निवर्त्तंते तस्माच्चे मनसा सह ॥८३॥ यतो वा
चोभिधानानि प्रयुक्तान्युपलब्धये ॥ सर्वाण्यनभिधायैव निवर्त्तंते वबोध्यच ॥८४॥ उदपादि
वयच्छदैर्ज्ञानमाकारवर्ज्जियः ॥ स्वतो बुद्धं तदप्राप्य नाम्ना सह निवर्त्तते ॥८५॥ माहात्म्यमेतदुच्छद्द

स्य यद्विधान्निरस्यति ॥ सुषुप्त इव निद्रायां दुर्बलत्वाच्च बाध्यते ॥७६॥ दुर्बलत्वादविद्याया आत्म
त्वाद्बोधरूपिणः ॥ शब्दशक्तेरचिंत्यत्वाद्विद्मस्तं मोहहानतः ॥७७॥ अग्रहीतेव संबंधमभिधाना
भिधेययोः ॥ हित्वा निद्रां प्रबुध्यंते सुषुप्ते बोधिताः परैः ॥७८॥ जाग्रद्वन्न यतः शब्दं सुषुप्तो वेत्ति
कश्चन ॥ ध्वस्ते तो वचसा ज्ञाने ब्रह्मास्मीति भवेन्मतिः ॥७९॥ नाभेदः क्रिययोरत्र क्रियातत्फलभेद
ति. तः ॥ किं पूर्वमिंवोधस्य नात्रातः संभवो भवेत् ॥८०॥ अविद्यावृतिनः शब्दाद्दहं ब्रह्मेति धीर्भवेत् ॥ नश्यति
सविद्यया सार्द्धं हत्वा रोगमिवौषधं ॥८१॥ अविशिष्टं स्वतोबुद्धं शुद्धं मुक्तं ततो भवेत् ॥ नातः स्याद्भाव
नापेक्षा नापि मानोत्तरं प्रति ॥८२॥ अलौकिकत्वाद्बोधस्य स्वतश्चावगमात्मनः ॥ बोध्ये हि लौकिके पेक्षा
परतो वगतो तथा ॥८३॥ न धास्त्रीरे फलानीव प्रसक्षाद्यनपेक्षतः ॥ किमि वेहान्यमानेषु तवापेक्षाभि
धाश्रुतेः ॥८४॥ प्रमातो च प्रमाणं च प्रमेयो निश्रितिस्तथा ॥ यत्साक्षिध्यात्प्रसिध्यंति तत्सिद्धौ कि
मपेक्षते ॥८५॥ जाग्रत्स्वप्नसुषुप्तेषु घटोयस्मिन्तिसंविदः ॥ व्यवधानं न चेहास्ति तद्भावाभावसाक्षिता ॥८६॥

ङ्ग इदमेवमिदं नैवमिति बुद्धेर्विभागभाक्॥ अनात्मिकासवसत्र येनासौ किमपेक्ष्यते॥९७॥
कर्त्रादिव्यापृतेः पूर्वमसंकीर्णउपाधिभिः॥ अविक्षिप्तोह्यसंसुप्तोऽनुभवः किमपेक्ष्यते॥९८॥ अभि
धेयन्नेयद्वस्तुप्रत्ययश्चानढौकते॥ नियुक्तोऽपि नियोगेन कथं तद्द्रष्टुमर्हति॥९९॥ अपिमा
नांतरप्राप्तं वस्तुवृत्तं निवर्त्तयेत्॥ नियोगानुप्रवेशेन यदि वस्तु वबोध्यते॥१००॥ भाव्यतेऽस
न्नपीहार्थः प्रसिद्धे लौकवन्हिवत्॥ ब्रह्मणस्तु प्रसिद्धत्वात्तथाप्यत्र सुदुर्लभं॥१॥ क्रियते लौकि
प कोऽप्यर्थः पदार्थान्वयरूपतः॥ अवाक्यार्थात्मकं ब्रह्म तथाप्यत्र सुदुष्करं॥२॥ प्रमापामप्रमापांच
प्रमाभासस्तथैव च॥ कुर्वंसेव प्रमां यत्र तदसंभावनाकृतः॥३॥ प्रामाण्यमेव सृष्टेन कस्मान्नैव स
निधाश्रुतिः॥ नियोगस्यापि मानत्वं नानपेक्ष्य प्रमामिमां॥४॥ पश्येदात्मानमित्यादिवाक्यं यत्स्यादि
धायकं॥ स्नानकर्त्तव्यतायां तन्निर्धार्य पुरुषं कृतिं॥५॥ स्वव्यापारेनपेक्ष्यैव वस्तुवृत्तं बुबोधयतः॥ नियु
क्ते पुरुषं तस्माद्वस्तुवृत्तस्य दुर्लभं॥६॥ स्वशात्त्वं ननुरूपं चेत्कार्यवाक्यशतैरपि॥ नियुक्तोऽपि नत

ध्यतां ॥६५॥ जाग्रत्स्वप्नसुषुप्तेषु व्यस्तवृत्त्यानुरोधतः ॥ इयामः सुखी न वेद्मीति केऽप्यात्मानं
प्रसिद्धितः ॥६६॥ कार्यकारणाहानोत्र न विभागः परात्मनि ॥ अभावात्कर्मकर्त्रादेर्बोधएवावशि
ष्यते ॥६७॥ कारकाण्युपमृद्नातिविद्या बुद्धिमिवोखरे ॥ कारकत्वमविद्योत्थं स्वतश्चाकारका
त्मता ॥६८॥ यद्धि यस्य स्वतो रूपं न तत्तस्मात्सापेक्षते ॥ क्रियामन्यनिमित्तादपेक्षात्कर्त्तृत्वमपन्नवे न ४
॥६९॥ नैवेहान्नमयात्मानं जलूकावत्परं जसा ॥ उपसंक्रामतीत्यस्या द्रौणी संक्रांतिरिष्य
ते [illegible]०॥ बहिःप्रवृत्तिःसंक्रांतिः प्रत्यग्वृत्त्येति चेन्मतं ॥ मनोमयादिवन्नैवं विरुद्धा स्वात्मनि
क्रियया ॥७१॥ स्फुरंतीं न जलूकापि स्वात्मानं स्वात्मनां जस्या ॥ उपसंक्रामतीत्यत्र निर्भागत्वात्तथा
पिन ॥७२॥ तस्मात्साक्षिनं संक्रांतिर्नच कोशात्मकर्तृका ॥ पंचकोशातिरिक्तात्मकर्तृका परिशि
ष्यते ॥७३॥ कोशानासक्तरूपस्य सर्वांतरतमात्मनः ॥ अक्रियस्यैव संक्रांतिर्नभोवत्स्यात्सरात्म
नः ॥७४॥ गुहाश्रयाभिसंबंधो यो विद्याविभ्रमोद्भवेत् ॥ आत्मज्ञानाद्भ्रमध्वस्तौ संक्रांतिरितिगीर्यं ॥७५॥

पिन नियोगांतराद्भवेत्॥ स्यादेतदात्मबोधस्य नियोगविरहाद्यदि। पुमर्थकारिता पुंभिर्लभ्यते ४१
न तु लभ्यते॥१८॥ नियोगैकाधिगम्यत्वाज्ज्ञानकार्यस्य नान्यतः॥ प्रमांतरादिदं सिद्धं ज्ञात्वापि स्या
दभिधानतः॥१९॥ नैतदेवं यतो नेहज्ञेयोर्थव्याप्तिमात्रतः॥ फलांतरं प्रबोधस्य किंचित्संभाव्य
तेऽपि॥२०॥ अंतरेण नियोगं च स्वात्मबोधस्य सिद्धितः॥ स्वाध्यायोध्येतव्य इति ब्रूहि स्यात्किं नि
योगतः॥२१॥ नैवं यतोन्यदेवेदं विज्ञानांतरमात्मनि॥ सोपायं कार्यमिष्येवं चोद्यते केवलं परं॥२२॥
शब्दाज्जनितविज्ञानादतिरिक्तं परात्मगं॥ न हि शब्दसमुत्थेन ब्रह्मदर्शनेन शक्यते॥२३॥ तस्या
वाक्यार्थरूपत्वात्परिच्छेत्तुं घटादिवत्॥ नानापदार्थसंसर्गविशिष्टोयं यतस्मृतः॥२४॥ वाक्यार्थो
वाक्यविद्भिर्हि प्रमावाक्यं च नो मतं॥ तस्य चाविषयत्वात्तु ब्रह्मा वाक्यार्थरूपभृत्॥२५॥ विज्ञा
नांतरगम्यं तद्रूपेवं बलादपि॥ न चेद्वाक्योत्थविज्ञानग्राह्यं ब्रह्माभ्युपेयते॥२६॥ नाम्नाया
र्थो भवेत्तर्हि नैवं वेदार्थ एव च [illegible] थं वेदार्थते तस्य स्वेद्वा वाक्यार्थ इष्यते॥२७॥ पुंव्यापारान

धीनत्वान्नेनियोगादयं भवेत्॥ पदार्थानन्वयान्नापि वाक्योत्थो बोध आत्मनि॥१८॥ तदन्वयेपि
नैवायं वाक्यार्थत्वं समश्नुते॥ सामान्यमात्रवाचित्वे पदानां संक्षयोपतः॥१९॥ पदार्थव्यतिरेकेण
नच वाक्यार्थवाचकः॥ अतो वाक्यार्थरूपोयं योहं ब्रह्मेति निश्चयः॥२०॥ नियोगानुप्रवेशेन वस्त्व
तत्वमितिरितं॥ यत्तस्य परिहाराय श्लोकौ स्वाभिर्यथोदितः॥२१॥ इदं ज्ञेयमिदं ज्ञातं रूपाता
स्मीति विभागतः॥ सर्वदा दर्शनात्तावन्नाविधास्येषु विधतो॥२२॥ चिन्मात्रव्यतिरेकेपास
र्वसाप्रत्ययस्साक्षिणः॥ रूपांतरं न संभाव्यं प्रमाभासात्तथा हुतिः॥२३॥ हानोपादानहीनोयं
तत्साक्षित्वात्स्वतो ध्रुवः॥ द्रष्ट्रादिसाक्षिताप्यस्य तत्कारणसमाश्रयात्॥२४॥ इदं वेद्मि
न वेद्मीदमिति बुद्धिर्विवर्त्ततु॥ प्रत्यभिज्ञाश्रयासास्याद्द्वैवोभयरूपभाक्॥२५॥ निर्विभागा
त्मकत्वाच्च सर्वकोज्ञातिवर्त्तिनः॥ रूपं नानात्मवज्ज्याय्यं प्रत्यभिज्ञासमाश्रयं॥२६॥ प्रतिस्मृ
त्यान्यतः प्राप्तरूपं यत्सारिणामिकं॥ ज्ञाताप्रत्यभिजानाति प्रत्यक्षार्थोपसंहृतः॥२७॥ बुद्धेः

पु नि द

स्यादपराधोयंयद्वाह्यार्थानुकारिता॥ किंचिन्निभत्वंचकौटस्थ्यान्नायमात्मनि॥३८॥अ
न्वयव्यतिरेकाभ्यांजाग्रत्स्वप्नसुषुप्तिषु॥ बाह्यंनिरस्यधीरूपंचिन्मात्रात्मावभासयेत्॥३९॥
धियोपलक्ष्यावाक्यार्थंसर्वदाप्यभिसारतः॥ व्यभिचारिप्यबाधेनतत्त्वमस्यादिष्वपि॥४०॥
देहंहरिखिलमज्ञानंबोधयत्सेवकेवलं॥ सामानाधिकरण्यादेर्घटेतरखयोरिव॥४१॥व्यावृत्ते
स्यादवाक्यार्थःसाक्षान्नस्तत्त्वमर्थयोः॥ वाक्यादेवमवाक्यार्थोपिस्यात्साक्षात्प्रसिद्ध्यति॥४२॥अ
न्यदैवैभिस्यादिसर्वस्यात्तुषकंडनं॥ अज्ञानमन्यथाज्ञानंसंशयज्ञानमेवच॥४३॥यदा
दावेर्तदृष्टंनज्ञातदज्ञानसाक्षिषु॥ अज्ञानादित्रयंतावत्स्यात्प्रत्ययेपिनविद्यते॥४४॥तस्य
त्यव्यवधानेनप्रायक्षान्नान्यमानता॥ ज्ञातुरव्यवधानेनसंशयोनिश्चयोपिवा॥४५॥प्रसयः
प्रथतेयस्मान्नमानांतरकांक्ष्यतः॥ अज्ञानादित्रयंयावत्ज्ञाततयैपिनविद्यते॥४६॥किमंग
सर्वदालुप्तचक्षुष्यामनिर्केवलो॥ ईदृताज्ञोपमेप्रोयमवाक्यार्थात्मकस्तथा॥४७॥सुषुप्तेगम्यते

सिद्धावलं शक्यसाहीश्वरैः॥७॥ अभिधाश्रुतिश्चेत्तत्सिद्धौ व्यायच्छेत्तु प्रयत्नतः॥ विधेर्वर्त्मानु
गामित्वान्नार्थस्यैकस्यास्य तं च तः॥८॥ स्वमांसान्यपि खादेदिति नियोगान्न तिलं छिनः॥ जहत्स्वपि प्रिया
न्प्राणान्न शक्यार्थत्वात्ततो विहि॥९॥ अशक्ये विनियुक्तोपि क्ष्मापालां छमयेदिति सर्वलिनाप्यसौ
कुर्वन्न्यकुर्यात्तस्करकेदुवत्॥१०॥ न चोपास्त्यन्तराधीनो ब्रह्मज्ञानोदयो भवेत्॥ तं यथा तं तमेवेति न्याय
दृब्ध्यश्रुतेः स्मृतेः॥११॥ नार्थस्य भावना चेत्स्याब्रह्मधीजन्मने न सा॥ स्वभ्यस्ता राजतीनो धीः शु
क्तिकाज्ञानजन्मने॥१२॥ द्रष्टव्यश्चेद्भवेदात्मा स्यान्नियोगस्तदात्मनि॥ निषेधाद्दर्शनस्येह न नियोगो
स्य ततः परे॥१३॥ नियोगानुप्रवेशेन वस्तुतत्वं प्रबोध्यते॥ न हि विध्यनपेक्षस्य प्रामाण्यमनुवादिनः तर
॥१४॥ नैवं यतः क्रियैवेह चोदनाभिर्विधीयते॥ स्वव्यापारे यैस्ताभिर्नियोक्तुं शक्यते पुमान्॥१५॥ द्रष्ट
स्वस्तपेस्ता ध्यस्त्वात्कथं ताभिः प्रवर्त्यते॥ न चापीहात्मविज्ञानं चोदनाभिर्विधीयते॥१६॥ स्वाध्यायो
ध्येयैतव्य रतिश्चितस्मात्तस्य सिद्धितः॥ कर्मावबोधो नयथा नियोगान्तरमीक्षते॥१७॥ तथैवात्मावबोधो

नैव हेतोः प्रसिद्ध्यति ॥ विधिश्रुत्यस्य वाक्यस्य प्रामाण्यं प्रसमात्मनि ॥ ५८ ॥ येषां प्रका
श्यत इति न तेषां मतिरीदृशी ॥ प्रकाश्यत्वाश्रयत्वाभ्यां व्यापारः सर्व एव च ॥ ५९ ॥ तस्मिन्नस
ति तन्मिथ्या यदेतद्भवतीरितं ॥ अस्थूलाशब्दतावादि प्रकाशत्वादिकुप्यति ॥ ६० ॥ नियोगानु
प्रवेशेन यदि वस्तु प्रकाश्यते ॥ न चाप्रमाणता तस्य नियोगोत्संगसंश्रयात् ॥ ६१ ॥ एवमप्य
प्रमाणं चेन्नियोगो विषयो भवेत् ॥ अदृश्यं पश्य इत्येवं नियुक्तोपि न शक्नुयात् ॥ ६२ ॥ शक्नु
यात्स नियोगाच्चेत्कुर्यात्तु स्वकरं द्रुवत् ॥ विदितेतरातिरेकि तद्ब्रह्मरूपानुवादिभिः ॥ ६३ ॥ नियो
गगर्भवचनैः पश्येदिति विरुध्यते ॥ विज्ञातारमरे केन विजानीयादिति श्रुतिः ॥ ६४ ॥ न दृष्टेरिति ति
दृश्यत्वं नियोगैरेव वार्यते ॥ सदावगतिरूपस्य ज्योतिश्चकावभासिनः ॥ ६५ ॥ स्वयंज्योतिः
स्वभावस्य न्याय्यं तस्यान्यदर्शनं ॥ द्रष्टा चेद्दृश्यते दृश्यं प्रत्यक्षाविषयं कथं ॥ ६६ ॥ कर्मक
र्तृत्वमेकस्य द्रोणब्रह्मात्मदर्शने ॥ अदृष्टं तद्धि कर्म ह्यालोकोटरच्छायान्नापि दृष्टिदृष्टं ॥ ६७ ॥ अ

न्यादिविक्रियाषड्कनिषेधाप्येऽप्रमथमानं॥ प्रमातृत्वादिभेदेन यत्स्वरूपं प्रतीयते ॥६८॥
तत्सकाश्यत इत्याहुरप्रकाशास्वरूपतः॥ प्रमातैव प्रमेयं चेत्प्रमाणं प्रमितिस्तथा ॥६९॥
स्वरूपाद्येकरूपत्वान्न तद्भेदो निरूप्यते॥ प्रमाण्यमनुवादानां न चेत्स्वविषये मतं ॥७०॥ पयो
गुपास्य संबंधो न प्राप्नोति जुहोतिना॥ स्वर्गे पौषोऽभिसंबंधः पयसश्चेदनुत्तरां ॥७१॥ स्वर्गस्यास्ति
द्वयेनालं द्रव्यमात्रं प्रयोयतः॥ प्रपायः साधनत्वे च प्राप्तं तस्मादनूद्यते ॥७२॥ विशिष्टो
पाश्रयं द्रव्यमतोलं प्रसिद्धये॥ गोदोहनस्य भिन्नत्वाभिन्नं चेत्साधनं मतं ॥७३॥ पाता
प्रपायतीसस्यसाध्यभेदाद्विभिद्यते॥ हानोपादानशून्यत्वादप्रमाण्यंमतं यदि ॥७४॥
ब्रह्मास्मीति परिज्ञानमप्रमाणं प्रसज्यते॥ आत्महादनुपादेयमनन्यत्वादहेयता ॥७५॥ अपि
धाश्रुतेश्चेदतस्यात्किमन्यत्प्रार्थ्यते विधेः॥ अनूक्तेरपि मानत्वं नैव ध्वांक्षैर्विलुप्यते ॥७६॥
नियोगानुप्रविष्टत्वाद्यथैवेहाभिधाकृते॥ एवं च सति दृष्टांतो भवतां नोपपद्यते ॥७७॥ नियो

गा देव विज्ञानमिसेवं नियमः कुतः॥ वादानुवादयोरर्थो यदि भिन्नः प्रतीयते॥ ७८॥ अवाम ४४
तार्थाधिगंतृत्वादस्य नूत्क्तेः प्रमाणता॥ अन्यक्षं भिन्नरूपाधीरिह वादानुवादयोः॥ ७९॥ अ
पूर्वाधिगतिः पूर्वामिह बुद्धाववबोधनं॥ मृगतोयादिवन्मिथ्या पद्यनूक्तेः भवेन्मतिः॥ ८०॥ वि
धेर्निर्विषयत्वं वः सर्वत्रैव प्रसज्यते॥ स्वाभिधेयं निराकांक्षो ह्यनुवादः प्रबोधयेत्॥ ८१॥ त
त्रैव दप्रमाणं स्यात्स्या घेय तदुच्चारणं वृथा॥ साकांक्षतानुवादत्वे कुतश्चावगतेह्य यो॥ ८२॥
अप्रमाण्यान्न चेतान्यां विधेयप्रक्षयाद्विधेः॥ स्वशब्दानभिधेयं यत्तदेवापेक्षते पदं॥ ८३॥ स्वार्थे
तदप्रमाणं चेद्वाक्यार्थस्यान्वयः कुतः॥ अप्रमाणमिति ह्यानंक स्मादशायि कथ्यतां॥ ८४॥ नो
विधमानोपलंभीनि नत्य भावं प्रसिध्यते॥ परस्वभावविध्वंसवत्मनैवात्मवस्तुनः॥ ८५॥ वक्ष्य
त्यवगतिं चोर्ध्वं विधिनेन्नेति दुस्थितं॥ व्यावृत्तिः परतऽभावोन च तस्यैंद्रियग्रहि॥ ८६॥ संबंधो
स्ति ततो भे[illegible]प्रमाणोनोपलं[illegible]ता॥ प्रमाभावस्वरूपत्वान्नाप्यभावाद्भिदेष्यते॥ ८७॥ संविद्धिषेभावो

स्मात्सिद्धं त्वस्तु श्रुतिगोचरात्॥ सर्वदा चात्मरूपत्वाद्विधिसाध्यादनात्मनः॥४८॥ ब्रह्मात्म
नि स्वतःसिद्धं ज्ञानं मोहापनोदियत्॥ ज्ञाताज्ञात विभागोस्मिन्न ज्ञानाज्ञानात्मता तथा॥४९॥ ज्ञा
त्रे तृज्ञातिहमप्येवं स्वतःसिद्धेर्न साक्षिणः स्वव्यापारे नियोगोपि नियुक्ते पुंसि पंबलात्॥५०॥ यथाभू
तार्थता बुद्धेर्वस्तुत्वीन तु पौरुषी॥ इदमेवमदोनेति यथैवार्थं मतं विद्धि॥५१॥ वेत्ति तत्त्वमसीत्येवं
किं न वेत्त्यभिधाकृतेः॥ क्रियायां विधिसंपातः कर्त्रादिषु न सिद्धितः॥५२॥ न चानेकार्थतैक
स्य स्य वाक्यस्य भवतेष्यतो॥ प्रत्यक्षादेव भेदोयमभिधाननियोगयोः॥५३॥ तस्य चेदव्यभिचारित्वं
व्यर्थं सर्वज्ञभाषितं॥ कर्तुः क्रियायां स्वातंत्र्यं वस्तुवृत्ते ह्यनीश्वरः॥५४॥ वस्तुवृत्तं च नो मुक्तिः
क्रियातश्चेदनित्यता॥ यथा वस्तु हिया बुद्धिः सम्यक् ज्ञानं तदेव नः॥५५॥ पौरुषो समात्रे त्वम या२
ज्ञानं रजतादिवत्॥ वस्तुमात्रानुरोधि वा सम्यक् ज्ञानं दुष्करं॥५६॥ नियोगानुप्रवेशेन स्य२
वस्तुतत्त्वावबोधनं॥ नियोगानुप्रवेशो वा हेतो व्याप्तिः प्रदर्श्यतां॥५७॥ गमकत्वमतेर्व्याप्तिं

स्म

निर्विष्टपदार्थयोः॥ अन्वयव्यतिरेकाख्यविवेकाय विधिर्भवेत्॥७॥ वाक्यार्थप्रतिपत्तौ हि प
दार्थज्ञानमेव च॥ प्रतिबंधो यतस्तस्मादन्वयाद्यवलोकनं॥८॥ वाक्यार्थज्ञानकालेयः पदा
र्थो नैव विद्यते॥ कर्त्तव्यःकारकापेक्षो विधेयेऽसन संशयः॥९॥ विपरीतस्ततोयस्तु वाक्यादे
वावगम्यते॥ नियोककर्मप्रयुक्तःसन्न न विधेयःकथंचन॥१०॥ स्वसिद्धेःकारणं नान्यत्त्वज्ञान
मज्ञानहानये॥ यस्मादपेक्ष्यते तस्मान्न निदिध्यासनायतत्॥११॥ सिद्धमप्यात्मकार्यस्य
कारणं सिद्धये न चेत्॥ विद्यापेक्ष्यं तदेवस्यान्न स्वसिद्धिप्रकाशकं॥१२॥ तस्मात्कूटस्थ
विज्ञानं प्रसाख्याताखिलद्वयं॥ आनंदो ब्रह्मणो विद्वान्न बिभेति कुतश्चन॥१३॥ ब्रह्मणो ब्राह्म
णस्येति भेदश्चात्रौपचारिकः॥ राहोः शिरोवन्मुख्यस्तु नैव स्यान्निर्गुणात्मतः॥१४॥ महिमा ब्रा
ह्मणस्यैष हानिवृद्धिविवर्जितः॥ अतः सिद्धे विज्ञानं स्वं न बिभेति कुतश्चन॥१५॥ विद्वान्न सन्न
बिभेतीति [illegible]काकालं भवेत्फलं॥ [illegible] स्वर्गादिवन्न्याय्यं [illegible]ज्ञानस्याप्यतीतिवत्॥१६॥ यतोऽविद्या

तिरेकेण प्रतिबंधो न विद्यते॥ तस्माशान्तं तरां मुक्तिं विद्यानितिततो वदन्॥१७॥ भयं हेतुर्द्वै
तं यस्मात्तच्चाविद्यासमुद्भवं॥ प्लुतायां विद्यया तस्यां न कुतश्चन भीर्भवेत्॥१८॥ तापरस्मिधिये
तस्मिन्नस्रसगात्मनि केवले॥ निरस्तायामविद्यायां भयं नास्ति कुतश्चन॥१९॥ निर्द्वैतपदवाक्या
र्थमियेवंप्रतिपत्तये॥ यतोवाचोनिवर्त्तंत इत्येवंवचनं श्रुतेः॥२०॥ तथा मनो विकल्पानां निषेधा
य परात्मनि॥ धिया सहेमतो वक्ति श्रुतिर्याथात्म्यबोधिनी॥२१॥ निषिध्यनायमात्मेति भिन्नमा
त्मोपलंभनं॥ अनन्यानुभवं ब्रह्म यमेवेत्याह नः श्रुतिः॥२२॥ प्रत्यग्ब्रह्मावसायि बाह्ये द्वा
नीं रज्जुसर्पवत्॥ उदाहारित तः श्रुत्या यं अन्नो कोमनोमये॥२३॥ विद्वानेव परं ब्रह्म आत्मना
त्मानमव्ययं॥ न बिभेसे कलो द्वंद्वो भयहेतोरसंभवात्॥२४॥ ननु साधु क्रिया हेतुः पापानुष्ठानमेवस॥
इ सेतस्य निषेधार्थमेतं हेत्युच्यते धुना॥२५॥ नैतमेवं विदं पस्माद्भावेती हावधारणो॥ नतपदं
तकालेतमकर्त्ताहमवेदितं॥२६॥ क्रियाफलस्य सर्वस्य कर्तृगामित कारणात्॥ धिग्मां योहं

४८८

शुभं कर्म जीवन्नाकरवं क्वचित ॥२७॥ अकार्षं च सदा पापं यतो भयमुपस्थितं ॥ अस्माद्धेतो
र्महांस्तापो विद्यासंवीतचेतसां ॥२८॥ जायते मृतिकाले हि हिक्कि कोवत्ता वर्त्तिनां ॥ फलस्या
यं स्वभावो हि यस्त्र कर्त्तनुगामिता ॥२९॥ अतो न तपतोऽज्ञो स्वावकर्त्तारं शुभाशुभे ॥ कस्मा
न्न तपतस्तो चेद्धमाधर्मौ विपश्चितं ॥३०॥ कोटस्थ्याद्द्वयस्वात्त्वपूष्प्येव शुभाशुभे ॥ स यएवं
यथोक्तार्थं विद्वानेत शुभाशुभे ॥३१॥ साधुकर्माक्रियायाच पापानुष्ठानमेव च ॥ अकर्त्तास्मीति विज्ञान
डु हतौ शीनां जसा ईतं ॥३२॥ दग्धौ निरन्वये कृत्वा स्वात्मानं स्यपृतेपतः ॥ स्वपोतिर्बलकर्माय मात्मानं बल
यसतः ॥३३॥ अविद्यासंश्रयाद्दात्मा बलीयान पि दुर्बलः ॥ अविद्याराजयक्ष्मास्य काशुभेति तयायतः ॥
॥३४॥ द्धुस्तायां विद्यया तस्या मात्मानं बलयस्यतः ॥ बोधेनेव निस्तायां निद्रायां स्वप्नदर्शनं ॥३५॥ बु २२
द्धो मशेषता मेति तथैहैकलशेषसौ ॥ अथवा एष एव बोधसत्वोदृश्यादिलक्षपः ॥३६॥ शुभाशुभे
यतस्तास्या दात्मानं बलयसेयं ॥ लिंगदेहाश्रितं कास्यं तत्त्व कर्मनिबंधनं ॥३७॥ कर्मकर्त्रादिसंभूतं

नवेहप्रकाशयति किंचन...ेतिस्वाभिमतं सर्वं तेन चास्य विरुद्धता॥८८॥ वस्तुवृत्तानुरोधेन
व्यापारः फलवानिह॥ न कुर्मो लवशो ह्यामशारावायाफलं यतः॥८९॥ आत्मज्ञानं प्रसिद्धं चेद्वि
धेरेव विधिः कुतः॥ अथाप्रसिद्धं नैरां विधिर्नैवोपपद्यते॥ कैवल्यकारितात्बुद्धेर्नियोगादे
वचेद्भवेत॥ नियोगार्थावगतये नियोगोन्योपि मृग्यतां॥९०॥ तत्त्वमस्यादिवाक्योत्थं विज्ञा
नं सफलं स्वतः॥ अतोवगम्यते स्वाभिसत्यस्वारव्य फलवद्भवेत्॥९१॥ साध्यायोध्येतव्य इति विध्यं
तरमृतेयथा॥ विध्यर्थावगमस्तद्वदस्त्विहाप्यभिधाकृते॥९२॥ नियोगविरहादस्य यद्यर्थाव
गमोमृषा॥ इहापितद्दमानत्वमभिधानकृते रिवा॥९३॥ भवेद्वैदिद्ध्युत्कूला वाऽभिधा यदि
वा विधिः॥ अभिधावर्त्मयायी स्यात्तत्र दोषगुणादिमो॥९४॥ स्याद्धुलोकाद्विरुद्धानं यदि विध्य
नुरोधिनी॥ अभिधाकृतिरद्दृष्टार्थासम्यक्ज्ञानं सुदुर्लभं॥९५॥ अथाभिधानुरोधी स्यान्नियो
१र्थावसा गोयं तथापि च॥ अभिधानुविधायित्वाद्विध्यर्थोत्र सुदुर्लभः॥९६॥ प्राक्तुवाक्यार्थविज्ञानोत्तं

२ को ५

अन्नं प्राणमित्तीत्यादि वरुणो भृगवे वदत्॥ देहकारणमन्नं स्यात्प्राणः प्राणादिकारणं॥ ५०॥ चक्षुः
श्रोत्रं मनो वाक्करणान्युपलब्धये॥ अन्वयव्यतिरेकोक्तिर्ब्रह्मणो वोपलब्धये॥ ५१॥ अनिर्देश्यस्य
वाङ्मनोलक्षणस्य प्रवृत्तये॥ अन्नं प्राणमितीत्यादि प्रत्यक्षधर्मापि दिश्यते॥ ५२॥ प्राणस्य प्राणमित्ये
वं श्रुतिरप्याश्रिता भवेत्॥ कर्मश्रुतिश्च ब्रह्महेवाचमित्यादि युज्यते॥ ५३॥ अन्नादयः पदार्था वा अ
न्वयव्यतिरेकयोः॥ इहोच्यंते प्रवह्मर्थं सो कयं स्यात्कथं स्थिति॥ ५४॥ उत्पत्तिस्थितिनाशे
षु ब्रह्मादिस्थावरावधि॥ नास्तीति ब्रह्मरूपं यत्तद्ब्रह्मेति प्रतीयतां॥ ५५॥ विजिज्ञासस्व
तद्ब्रह्म यदेवं लक्षणं भवेत्॥ अनुसत्र महीनैव जगदुत्पत्तिहानिभिः॥ ५६॥ तपश्चचार तद्ब्र
ह्मलाभे गुरुर्ब्रह्मोपलब्धये॥ प्रतिपेते तपोनुक्तं सावशेषोक्तिकारणात्॥ ५७॥ अनुग्राहिकयोक्तापि
ह्यन्नं ब्रह्मेति लक्षणं॥ पितो वाक्यतत्त्वं स्यात्तपो भेजे स्वयं भृगुः॥ ५८॥ ब्रह्म साक्षान्न निर्दि
ष्टं लक्षण[illegible]केरतो भृगुः॥ न[illegible]मा कांक्षते योग्यं साधनं ब्रह्मविद्धये॥ ५९॥ तपो विशेष

दिसास्यात्तत्साधकतमत्वतः ॥ प्रदुक्ततरं यद्दुरौमिति श्रुत्यनुशासनात् ॥६०॥ मननश्चोदि
ध्यानां चेत्येवमोघात्मकं तपः ॥ इहान्वाय्यं प्रसिद्धं तु स्याद्दुपकरोति नः ॥६१॥ अन्वयव्यतिरे
कादिचिंतनं वा तपो भवेत् ॥ अहं ब्रह्मेति वाक्यार्थबोधायालमिदं यतः ॥६२॥ कोहं कस्य कुतो
वेति कः कथं वा भवेदिति ॥ प्रयोजनमतिर्नित्यमेवं मोक्षाश्रमी भवेत् ॥६३॥ व्यासः प्राहातए
वेदं मुमुक्षोर्मुक्तये तपः ॥ यतो वा इतिवैवं स्यादुक्तमेव परं तपः ॥६४॥ उक्तलक्षणसपन्नेत
पस्त्वा प्रपत्नवान् ॥ अन्नं ब्रह्मेति भूतानामुत्पत्त्यादिसमन्वयात् ॥६५॥ उक्तान्यन्नमयादीनिया
नि तेषां तु कारणं अन्नादि प्रतिपत्तव्यं न हि कार्यस्ति लक्षणं ॥६६॥ अगुणं ह्यन्नमयादेत
दन्नादेरुपजायते ॥ कार्यप्रविलयश्चैतत्साकारणानंदमेयतः ॥६७॥ कार्याणि कारणे चैवं तानि
चैवोत्तरोत्तरं ॥ प्रविलाप्य परानंदं यायाद्वाचामगोचरं ॥६८॥ अन्नं ब्रह्मेति विज्ञाय कार्यत्वं
तस्य वीक्ष्य च ॥ संज्ञायोच्छित्तये भूयो गत्वा पृच्छद्गुरुं भृगुः ॥६९॥ अन्नादेब्रह्मणश्चैवंदो

नैवेह प्रकाशयति किंचन॥ तिस्वाभिमानं सर्वं तेन चास्य विरुद्धता॥८८॥ वस्तुवृत्तानुरोधेन
व्यापारः फलवान्निह॥ न कुलालवद्गाह्योमशरावायावल्लंयत॥८९॥ आत्मज्ञानं प्रसिद्धं चेद्वि
धैरेव विधिः कुतः॥ अथाप्रसिद्धं नैरां विधिर्नैवोपपद्यते॥ कैवल्यकारितावुद्धेर्नियोगादे
वच्छेद्धवेद॥ नियोगार्थावगतये नियोगोन्योपि मृग्यतां॥९०॥ तत्त्वमस्यादिवाक्योत्थं विज्ञा
नं सफलं स्वतः॥ अतोवगम्यते स्याभिसन्ध्यारव्यफलवद्भवेत्॥९१॥ आध्यायो ध्येतव्य इति विध्यं
तरमृते यथा॥ विध्यर्थावगमस्तद्वदस्त्विहाप्यभिधाश्रुतेः॥९२॥ नियोगविरहादस्य यद्यर्थाव
गमो मृषा॥ इहापि तदमानत्वमभिधानश्रुते रिवा॥९३॥ न वे वैद्विध्यं कूलावा अभिधायदि
वा विधिः॥ अभिधावर्त्मयायीस्यात्तत्र दोषगुणादिमो॥९४॥ स्याद्युलोकादिविज्ञानं यदि विध्य
नुरोधिनी॥ अभिधाश्रुतिरद्दस्रार्थासम्यक्ज्ञानं तु दुर्लभं॥९५॥ अथाभिधानुरोधी स्यान्नियो
१र्थावसा गोयं तथापि च॥ अभिधानुविधायिता द्विध्यर्थोत्र सुदुर्लभः॥९६॥ प्राक्तु वाक्यार्थविज्ञानात्तं

अन्नं प्राणमितीत्यादि वरुणो भगवेव दत्॥ देहकारणमन्नं स्यात्प्राणः प्राणादिकारणं॥५०॥चक्षुः
श्रोत्रं मनो वाक्करणान्युपलब्धये॥ अन्वयव्यतिरेकोक्तिर्ब्रह्मणो वोपलब्धये॥५१॥ अनिर्देश्यस्य
वा भूम्नो लक्षणस्य प्रवृत्तये॥ अन्नं प्राणमितीत्यादि प्रसक्तधर्मोपदिश्यते॥५२॥ प्राणस्य प्राणमित्ये
वं श्रुतिरप्याश्रिता भवेत्॥ कर्मश्रुतिश्च ब्रह्म हे वाचमित्यादि युज्यते॥५३॥ अन्नादयः पदार्था वा अ
न्वयव्यतिरेकयोः॥ इहोच्यं ते प्रवृत्त्यर्थं सो कयं स्यात्कथं स्थिति॥५४॥ उत्पत्ति स्थिति नाशे
षु ब्रह्मादि स्थावरावधि॥ नासेति ब्रह्मरूपं यत्तद्ब्रह्मेति प्रमीयतां॥५५॥ विजिज्ञासस्व
तद्ब्रह्म यदेवं लक्षणं भवेत्॥ अनुत्पन्ने महीनं च जगदुत्पत्ति हानि निः॥५६॥ तपश्चारतद्ब्र
ह्म भृगुर्ब्रह्मोपलब्धये॥ प्रतिपेते तपोनुक्तेः सावशेषोक्तिकारणात्॥५७॥ श्रुंगग्राहिकयोक्तापि
ह्यन्नं ब्रह्मेति लक्षणं॥ पितो वा स्य यत्नस्तत्स्यात्तपो भेजे स्वयं भृगुः॥५८॥ ब्रह्म साक्षान्न निर्दि
ष्टं लक्षणं केरतो भृगुः॥ तपसा कोक्षते योग्यं साधनं ब्रह्मविद्धये॥५९॥ तपो विशेषा

दिसास्यात्तत्साधकतमत्वमतः॥ अद्भुततरं यद्दुरौमिति श्रुत्यनुशासनात्॥६०॥ मनश्चेंद्रि
याणां चैतस्यैव मोक्षात्मकं तपः॥ इहान्याय्यं प्रसिद्धं तु स्याद्रहस्युपकरोति नः॥६१॥ अन्वयव्यतिरे
कादिचिंतनं वा तपो भवेत्॥ अहं ब्रह्मेति वाक्यार्थबोधो यावदलमिदं यतः॥६२॥ कोऽहं कस्य कुतो
वेति कः कथं वा भवेदिति॥ प्रयोजनमतिर्नित्यमेवं मोक्षाश्रमी भवेत्॥६३॥ व्यासः प्राह तपए
वेदं मुमुक्षोर्मुक्तये तपः॥ यतो वा इति चैवं स्यादुक्तमेव परं तपः॥६४॥ उक्तलक्षणसत्पन्नेत
पस्त्वा प्रपन्नवान्॥ अन्नं ब्रह्मेति भूतानामुत्पत्त्यादिसमन्वयात्॥६५॥ उक्तान्यन्नमयादीनि या
नि तेषां तु कारणं अन्नादि प्रतिपत्तव्यं न हि कार्येऽस्ति लक्षणं॥६६॥ भृगुं ब्रह्मन्नमयं चैत
दन्नादेरुपजायते॥ कार्यप्रविलयं भूत्वा कारणानंदमेयतः॥६७॥ कार्याणि कारणेष्वेवं तानि
चैवोत्तरोत्तरं॥ प्रविलाप्य परानंदं यो याद्वाचामगोचरं॥६८॥ अन्नं ब्रह्मेति विज्ञाय कार्यत
त्स्य विक्षयतः॥ सन्न्यासोऽचित्तयै भूयो गलापृच्छद् गुरुं भृगुः॥६९॥ अन्नादेब्रह्मणश्चैवं दो

यं दृष्ट्वा सकार्यं तं ॥ भूयो भूयः परं ब्रह्म स्वप्रकाशात्प्रवर्त्तनात् ॥७०॥ यावत्साक्षात्परं ब्रह्म
करविन्यस्तबिल्ववत् ॥ न वेत्ति निर्बुभुत्सुः सन्स्तावद्विनिवर्त्तते ॥७१॥ विजिज्ञासस्व तद्
ब्रह्म तपसेति पुनः पुनः ॥ भृगुर्वरुणात्पपतौ हास्मात्तपसैवात्मवीक्षणं ॥७२॥ अन्वयव्यतिरेका
भ्यामेवं स ज्ञानकैर्भृगुः ॥ तपसैव परं ब्रह्म विजज्ञौ प्रत्यगात्मनि ॥७३॥ यस्मादेव मतः कार्यं
 संसारं प्रजिहासुभिः ॥ प्रत्यक्चैबोधाय सदा निष्कल्मषं तपः ॥७४॥ सुच्छायायारव्यापि
कारूपात्रान्निवृत्तमथाधुना ॥ श्रुतिः स्वेनैव रूपेण व्याख्यात्रेर्थं प्रयत्नतः ॥७५॥ भृगुणावि
दिता यस्माज्ज्ञानर्गवी यं भवेद्रुतः ॥ वारुणी वरुणोक्ता या तु विद्यास्याद्ब्रह्मवेदनात् ॥७६॥ सुष्ठ
दस्य द्विभागोऽयं यतो यावत्तत्तेजसा ॥ स आत्मा तत्परं व्योम तत्र विद्या प्रतिष्ठिता ॥७७॥ आत्म
नो ब्रह्मरूपो यत्र आत्मनो ब्रह्मता तथा ॥ अहं ब्रह्मेति वाक्यार्थमेवं वाक्यात्प्रपद्यते ॥७८॥ अन्यो
पि भृगवत्तत्त्वात्तपसैकाग्र्यलक्षणं ॥ कोशान्निरस्य पंचापि प्रतिष्ठां लभते परां ॥७९॥ ब्रह्म

कर्त्रा घटज्ञानहेतुकं ॥ अहं ब्रह्मेत्यतो ज्ञानाद् इत्याद्यं प्रत्यगात्मनि ॥ ३८ ॥ कार्यहेतावविद्याया मेकत्वाद्वलयस
यं ॥ स्वतो बुद्धं स्वतः शुद्धं स्वतो मुक्तं यथोदितं ॥ ३९ ॥ वेदैर्वयं स्वमात्मानं फलं तस्येदृशं स्मृतं ॥ इतीरि
शो तं परमं शास्त्रं ब्रह्माद्वयमरूपिणः ॥ ४० ॥ साक्षात्तद्बोधहेतुर्ब्रह्मवल्ली ह्युपनिषद्भवेत् ॥ विद्यैवोपनि
षज्ज्ञेया तयैवोपेयनिर्णयं ॥ ४१ ॥ विंदते निर्भयात्मानं तस्याद्उपनिषत्स्मृता ॥ इमां वल्लीं तु तादर्थ्यात्सिरब्रह्म
समाप्तानंदवल्ली विदो गुणात् ॥ ४२ ॥ सदोपनिषदित्याचुस्यत्के सर्वैष पारःप्रभो ॥ सत्यं ज्ञानमनंतं यद्ब्रह्मोक्तं प्रत्यगा
त्मनि ॥ ४३ ॥ तद्भिन्नं परं ज्ञानं मुक्तं मोहापनोदियत् ॥ अभिधित्सुरथेदानीं यथोक्तं ज्ञानसिद्धये ॥ ४४ ॥
यत्साधकस्य तमेतस्य प्राप्त्यै प्रवृत्ते श्रुतिः ॥ गुरुद्वारैव विद्येयमाचार्याद्धेति नः श्रुतिः ॥ ४५ ॥ शिष्याचार्योपा
ध्याय रूपेयमत आख्यायिकोच्यते ॥ ४६ ॥ अधीहि भगवो ब्रह्मेत्येतन्मंत्राभिशद्धितं ॥ अंतर्नीत निजार्थस्य
रत्वधीहिति भवेसैघतः ॥ ४७ ॥ जिज्ञासुः परमं ब्रह्म श्रद्धाभक्तिपुरःसरः ॥ उपसीदेद्गुरीयांसं मंत्रेणानेन
६ शुद्धधीः ॥ ४८ ॥ मोक्षादन्यार्षुभोगेषु व्यावृत्तकरणो भृगुः ॥ अध्यापय परं ब्रह्मेत्यपृच्छद्वरुणं गुरुं ॥ ४९ ॥

ब्र

कृतान्नं यत्नतः सदा॥ अपि चान्नस्य माहात्म्यमिदमन्यद्यथावयः॥९०॥ यथाश्रद्धं यथाकालं
यथासत्कारमेव च॥ अन्नं ददद्वाप्नोति तत्तथैव न संशयः॥९१॥ उपाचारक्षणं क्षेमो ब्रह्मेत
द्वाविसंश्रितं॥ क्षेमहेतुर्यतो वाक्यं तदुपासीत वाच्यतः॥९२॥ अप्राप्तप्रापणं योगः क्षेमश्चो
भयरूपभृत॥ प्राणापानश्च यं ब्रह्म तदुपासीत तो ह्यसः॥९३॥ योगक्षेमात्मकं ब्रह्म प्राणा
पान समाश्रयं॥ कर्मेति हस्तयोस्तद्वदुपासीता प्रमादवान्॥९४॥ तथा गतिरिति ध्येयं पादयो
ब्रह्म सर्वदा॥ विमुक्तिरिति पायोश्च समाज्ञा मानुषी स्मृता॥९५॥ मनुष्यविषयाय स्मा इदाज्ञा
विध्यो रियंततः॥ समाज्ञा मानुषी स्वेवं स दैवा चक्षते बुधाः॥९६॥ अथ देवी समाज्ञास्तत्र उ
पासीत यथाक्रमं॥ वृष्टो तृप्तिरिति ध्येयं तत्से दृष्टिसमन्वयात्॥९७॥ तेन ते नात्मना तद्वदुक्त
रेष्वपि सिंतयेत्॥ ब्रह्मोपस्थेप्युपासीत प्रजात्यादिगुणात्मकं॥९८॥ प्रजातिः पुत्रपौत्रादि
रमृतं तत पितुः॥ आनंदः पुरुषार्थेत्र सोप्युपस्था श्रयो भवेत्॥९९॥ आकाशे सर्वमिति
वं ब्रह्मोपास्यं समाहितैः॥ सर्वा [illegible] श्रयं तदाकाशमुपासीनस्य सिध्यते॥१००॥ तत्प्रति

छेत्युपासीत प्रतिष्ठावान्सो भवेत् ॥ उपासनानुरूपं स्यात्फलं यादृगिदं तथा ॥१॥ तद्ध
म मह इत्येवमुपासीत ततः फलं प्रआदिभिर्महान्सस्यात्तं यथेति श्रुतिस्तथा ॥२॥ तन्म
न इत्युपासीत मनस्वीवान् भवेत् ॥ प्रह्वीभावो नमोर्थः स्यात्फलं तस्येदमुच्यते ॥३॥ नम्यं
तेस्य यथा कामं विषया भोगकारिणः ॥ यस्तु ब्रह्मेति तद्ब्रह्मत्युपासीत यथोदितं ॥४॥ फ
लं तस्य तद्देवस्यादिति पूर्वमवादिषं ॥ ब्रह्मणो ब्राह्मणस्यैष परिमरं ब्रह्मतत्तदा ॥५॥ विद्युत्वृष्टिः
शशी भानुरग्निः श्चेति यतः श्रुतिः ॥ वायौ म्रियंत इत्याह परिमरस्तेन कीर्त्यते ॥६॥ अनन्यश्राय
रवं माकोशो वायुना ब्रह्मणा च सः ॥ द्विषंतश्चाद्विषंतश्च म्रियंते तस्य शत्रवः ॥७॥ प्रापो वा अन्न
मित्यादि विचंदं तस्य पूर्वया ॥ अन्नान्नादत्वं श्रुत्योक्तं कार्यतासंहतस्य हि ॥८॥ अन्नान्नादत्वं
मस्यैवकथं नाम प्रमीयते ॥ मात्मनि ब्रह्मणि तत्संक्तिर्मनोवाचामगोचरौ ॥९॥ अविद्याविषय
स्तज्ञोक्तभोज्यादिलक्षणः व्यवहारो वसेयः स्यान्नतु ससादिलक्षणे ॥१०॥ अविद्यो

द्वयाभासं भोज्यभोक्तृत्वलक्षणं॥ यत्र हि द्वैतमित्याद्या श्रुतिर्नः प्रमाणीपदत्॥११॥यत्र
त्वस्येति विध्वस्तसर्वाविद्यादिलक्षणे॥ निषेधातिस्फुटाविद्याध्वस्तोद्वैतमिहात्मनि॥१२॥
एकलाह्न न संसारः क्रियाकारकलक्षणः कुतस्तदिति चेत्तत्र सयः श्रायमितीर्यते॥१३॥
स हब्रह्मणेतिपञ्चोक्तं निर्णयः स्तस्य सांप्रतं॥ कथं नु स कलान्कामान् श्नुते युगपद्बुधः॥१४॥
प्रतिपत्तये स्यार्थस्य श्रुतिः प्रवृत्ते परा॥ न सहार्थे तृतीयेयं न्यायोत्र प्राकृ समीरितः॥१५॥
यतो तोऽत्र तृतीयेयं ग्राह्येत्थंभूतलक्षणा॥ हेत्वर्थी वा भवेदेषा तृतीया ब्रह्मणेतिया॥१६॥स लो
र्वकामाशनं यस्माद्ब्रह्मणेवोपपद्यते॥ निरात्मकस्य सर्वस्य ब्रह्मात्मा येन तत्परं॥१७॥
स संस्थानादिरूपत्वात्तद्दृतदधुनोच्यते सयश्चायमिति श्रुतिरन्नान्नादादिकस्य हि॥१८॥
यथस्य ग्रहणार्थायब्रह्मविद्योपरस्य तु॥ संक्रम्य विद्यया सर्वान् विद्योत्थानमात्मना॥१९॥आ
त्मनात्मानमाप्नः स सार्दृश्यादिलक्षणं॥२०॥ उत्क्रान्तरहीनः सन्निमाल्लोकान् क्रिया

छं प्रतिष्ठेति वल्ल्योक्तं पूर्वया तु श्रुतं। तस्यामेव प्रतिष्ठायां विद्वान्स प्रतितिष्ठति॥८०॥
अन्नाद्युपासकानां वा फलमेतद्धि होच्यते॥ यद्यन्नावोपासकानां मन्त्रादि फलकीर्तनं॥८१॥
प्रयोन्नवानन्नादीस्य वह्निर्महांश्चास्य प्रजादिभिः॥ शांतिदोषादि हेतुत्वात् ब्रह्मवर्चस मु
च्यते॥८२॥ अन्नमेव गुरुर्नान्यो यच्छ्रोतर ज्ञान हेतुतः॥ अन्नेन निंघात्तेनादौ व्रतं स्यात्तदुपा
सितुः॥८३॥ अन्योन्यस्थितिहेतुत्वादन्नान्नादत्वमुच्यते॥ शरीरप्राणयोरेवमुत्तरेष्वपि निर्णयः॥८४॥
प्राप्तं न परिचक्षीत तदन्नं व्रतमिदं भवेत्॥ अन्नं सुबहु कुर्वीत तथैवेहोत्तरं व्रतं॥८५॥ वसत्यर्थं
तथायातं प्रत्याचक्षीत नैव तं॥ वसते चान्नदानार्थं कुर्यादन्नं गृही बहु॥८६॥ एतद्वै मुखतत
इति सत्कारोक्तिस्त्रिधा भवेत्॥ वयावस्था त्रिधा वास्यादन्नदानविवक्षया॥८७॥ राद्धं सिद्धं भ
वेदन्नं पात्रेभ्यायस्य तस्य तु। यथा सत्कारवयसी अन्नदानफलं भवेत्॥८८॥ गृहिणोऽप्यन्नवंतो
ऽपि यतः आचक्षते सदा॥ अराद्धिसिद्धमेवान्नमतिथ्यर्थं न संशयः॥८९॥ इत एव मतः कार्यं ब

ड्वान्॥कामान्नीकामरूपी सन्नुपाधीननुसंचरन्॥२१॥नहि संचरणं साक्षाद्ब्रह्मणोस्य
विकारिणः॥यच्चहि ध्यायतीवेति तथाच श्रुतिशासनं॥२२॥सर्वस्मिन्वादिमांलोकान्प्रत्यन्नात्म
तयाबुधः॥एतद्ब्रह्मसमंसामगायन्नास्तेकृतार्थतः॥२३॥देवाभिन्नमिदंसर्वमन्नमन्नादएव
च॥सत्या दृश्यादिरूपात्मा अहमेवैतदीक्ष्यतां॥२४॥तयोः श्लोकश्च संबंधो भोज्यभोक्तृह
लक्षणः॥अहमेव यथोक्तात्मानमत्तोन्यस्ततोस्ति हि॥२५॥क्रियाकारकनिर्मुक्तपस्यश्रा
त्मानमात्मनि निरहो इति भवेत्तो भोविस्मयार्थश्च समतः॥२६॥चित्तत्किं श्रादरार्थेयम
हमन्नमितीर्यते॥अस्य दृश्यान्नलोकस्य प्रतिपसर्थमुच्यते॥२७॥मूर्तामूर्तात्मकस्या
स्य ह्यन्नान्नादहरूपिणः॥अतश्चान्नग्रजोहं वै नतदश्नाति हि श्रुतिः॥२८॥देवेभ्यः पूर्वमे
वाहं नाभिरस्यामृतस्य च॥कारणाद्वाङ्गवेन्नादिर्मन्नियच्चामृतात्मता॥२९॥अदेहा
रु न्नंपात्रेभ्योयोमामश्नाति घस्मरः॥अहमन्नमदंतं तं प्रहसन्नीहान्नवंनरं॥३०॥योमांददातिपा

त्रेभ्यो देशकालसमन्वितं॥ ददद्दिव्यमसावन्नं मामवसेव सर्वसदा॥२१॥ ससज्ञानादि
रूपोहमविद्योत्थमतोषतः अहंस्यनि भवामेको दिनरूच्छार्वरंयथा॥२२॥ ध्यानैकतानभि
बिडाहितचेतसोऽजंप्रध्वस्तहृस्त्रनिजमोहसमस्तदोषं॥ प्रयुक्तयामुमधियोयत
योऽप्युपेयये दैवमेकममलं प्रविशन्ति सोव्यात्॥२३॥ तैत्तिरीकसारस्य वार्त्तिकामृतमु
चामं॥ मस्करीन्द्रप्रपीतस्य भाष्यस्यैतद्विवेचनं॥२४॥ मुमुक्षुसार्थवाहस्य भवनाम
हृतोयतेः॥ शिष्यश्च कातङ्कत्याः सुरेशाख्यो महार्थवित्॥२५॥ ॥छ॥ ॥छ॥ ॥छ॥
ॐ तत्सत् तैत्तिरीयकश्रुतेर्वार्त्तिकं श्रीमन्नृसिंहचरण्प्रसादात्समाप्तं॥ छ॥

५२

१३
१२

अथ

"तैत्तिरीयवार्त्तिकम्"

नं१८

तैत्तिरीयवार्त्तिकं।

१६८

"सुरेशप्रणीतम्"

93/13

१३
13